Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अंतरंग कर्मका उदयकरि निपज्या संक्लेश करि देशसंयततैं भ्रष्ट होइ करि असंयत सम्यग्दृष्टी होइ तहां स्तोक अंतर्मुहूर्त कालमात्र रहि शीघ्र ही देश संयमकौं ग्रहै ताकैं भी स्थिति अनुभाग कांडकका घात न हो है जातैं दोय करण कीएं विना ही यहु देशसंयमकौं ग्रहै है। बहुरि जो जीव बाह्य कारणतैं सम्यक्त्व वा देशसंयमतैं भ्रष्ट होइ करि मिथ्यादृष्टी होइ तहां बडा अंतर्मुहूर्त वा संख्यात असंख्यातवर्ष पर्यंत रहि बहुरि वेदक सम्यक्त्व सहित देशसंयमकौं ग्रहै ताकैं अधःप्रवृत्त अपूर्व करण हो है। तातैं स्थिति अनुभागकांडक घात भी हो है ॥ १७५ ॥

देसो समये समये सुज्झंतो संकिलिस्समाणो य।
चउवड्ढिहाणिदव्वादवट्ठिदं कुणदि गुणसेढिं ॥ १७६ ॥

देशः समये समये शुध्यन् संक्लिश्यन् च।
चतुर्वृद्धिहानिद्रव्यादवस्थितां करोति गुणश्रेणीम् ॥ १७६ ॥

सं० टी०— अधःप्रवृत्तदेशसंयतः समयं समयं प्रति विशुद्धयन् वा संक्लिश्यमानो वा चतुर्वृद्धिहानिद्रव्यादवस्थितिगुणश्रेणिं करोत्येव। तथाहि—

विवक्षितस्य यस्य कस्यापि कर्मणः सत्त्वद्रव्यं स ∂/७ । १२- अस्मादयमथाप्रवृत्तदेशसंयतो यदा संक्लेशपरिणामं गत्वा पुनर्विशुद्धिमापूरयति तदा तद्विशुद्धिपरिणामानुसारेण कदाचिदसंख्यातभागाधिकं स ∂/७ । १२ १—/∂ । ओ ∂ कदाचित्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संख्यातभागाधिकं स ३ । १२ – १ कदाचित्संख्यातगुणितं स ३ । १२ – १ कदाचिदसंख्यातगुणं च—
७ । ओ १ ७ ओ

स ३ । १२ – ३ द्रव्यपकृष्य गुणश्रेण्यां, यदा तु विशुद्धिहान्या संक्लेशपरिणामं गच्छति तदा तत्संक्लेशपरिणामानुसा-
७ । ओ

रेण कदाचिदसंख्यातभागहीनं स ३ । १२ – ३ कदाचित्संख्यातभागहीनं स ३ । १२ – १ कदाचित्संख्यात-
७ । ओ ३ ७ । ओ १

गुणहीनं स ३ । १२ – कदाचिदसंख्यातगुणहीनं स ३ । १२ – वा द्रव्यमपकृष्य गुणश्रेणिनिक्षेपं करोति । वि-
७ ओ १ ७ । ओ ३

शुद्धिसंक्लेशपरिणामपरावृत्तिवशेनैवंविधद्रव्यापकर्षणसंभवात् । एवं स्वस्थानदेशसंयतो जघन्येनांतर्मुहूर्तपर्यंतमुत्कर्षेण देशोनपूर्वकोटिपर्यंतं च गुणश्रेण्यायामे द्रव्यं निक्षिपतीत्यर्थः ॥ १७६ ॥ देशसंयतस्यानुभागखंडोत्करणकालादीनामल्पबहुत्वप्रतिपादनप्रतिज्ञाप्रदर्शनार्थमिदमाह—

स० चं०— अथाप्रवृत्त देश संयत जीव सो कदाचित् विशुद्ध होइ कदाचित् संक्लेशी होइ तहां विवक्षित कर्मका पूर्व समयविषैं जो द्रव्य अपकर्षण कीया तातैं अनंतर समयविषैं विशुद्धताकी वृद्धिके अनुसारि कदाचित् असंख्यातवे भाग बधता कदाचित् संख्यातवां भाग बधता, कदाचित् संख्यातगुणा कदाचित् असंख्यातगुणा द्रव्यकौं अपकर्षण करि गुणश्रेणिविषैं निक्षेपण करै है। बहुरि विशुद्धताकी हानिके अनुसारि कदाचित् असंख्यातवे भाग घटता, कदाचित् संख्यातवे भाग घटता, कदाचित् संख्यातगुणा घटता कदाचित् असंख्यातगुणा घटता द्रव्यकौं अपकर्षणकरि गुणश्रेणिविषैं निक्षेपण करै है । ऐसैं अधाप्रवृत्त देश संयतका सर्व कालविषैं समय समय यथासम्भव चतुःस्थान पतित वृद्धि हानि लीएं गुणश्रेणि विधान पाइए है ॥ १७६ ॥

विदियकरणादु जावय देसस्सेयंतवड्ढिचरिमेत्ति । २२९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अप्पावहुगं वोच्छं रसखंडद्धाण पहुदीणं ॥ १७७ ॥

द्वितीयकरणात् यावत् देशस्यैकांतवृद्धिचरमे इति ।

अल्पबहुत्वं वक्ष्ये रसखंडाद्धानां प्रभृतीनाम् ॥ १७७ ॥

सं० टी०— अपूर्वकरणप्रथमसमयादारभ्य एकांतवृद्धिदेशसंयतपर्यंतं संभवतां जघन्यानुभागखण्डोत्करणकालादीनामष्टादशपदानामल्पबहुत्वं प्रवक्ष्यामीति प्रतिज्ञार्थः ॥ १७७ ॥ अथ तान्येवाल्पबहुत्वपदानि प्ररूपयितुं गाथाषट्कमाह—

स० चं०—अपूर्व करणतैं लगाय एकांत वृद्धि देश संयतका अंत पर्यंत सम्भवते जे जघन्य अनुभागखंडोत्करण कालादिक रूप अठारह स्थान तिनिका अल्पबहुत्व कहौंगा ॥

अंतिमरसखंडुक्कीरणकालादो दु पढमओ अहिओ।
चरिमट्ठिदिखंडुक्कीरणकालो संखगुणिदो हु ॥

अंतिमरसखंडोत्करणकालतस्तु प्रथमोऽधिकः ।
चरमस्थितिखंडोत्करणकालः संख्यगुणितो हि ॥ १७८

पढमट्ठिदिखंडुक्कीरणकालो साहियो हवे तत्तो।
एयंतवड्ढिकालो अपुव्वकालो य संखगुणियकमा ॥

प्रथमस्थितिखंडोत्करणकालः साधिको भवेत् ततः ।
एकांतवृद्धिकाले अपूर्वकालश्च संख्यगुणितक्रमः ॥ १७९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवरा मिच्छतियद्धा अविरद तह देससंजमद्धा य।
छप्पि समा संखगुणा तत्तो देसस्स गुणसेढी १८०

अवरा मिथ्यात्रिकाद्धा अविरता तथा देशसंयमाद्धा च।
षडपि समाः संख्यगुणा ततो देशस्य गुणश्रेणी ॥ १८० ॥

चरिमाबाहा तत्तो पढमाबाहा य संख्यगुणियकमा।
तत्तो असंखगुणियो चरिमट्ठिदिखंडओ णियमा ॥

चरमाबाधा ततः प्रथमाबाधा च संख्यगुणितक्रमा।
ततः असंख्यगुणितः चरमास्थितिखंडको नियमात् ॥ १८१ ॥

पल्लस्स संखभागं चरिमट्ठिदिखंडयं हवे जम्हा।
तम्हा असंखगुणियं चरिमट्ठिदिखंडयं होई॥१८२॥

पल्यस्य संख्यभागं चरमस्थितिखंडकं भवेत् यस्मात्।
तस्मादसंख्यगुणितं चरमं स्थितिखंडकं भवति ॥ १८२ ॥

पढमे अवरो पल्लो पढमुक्कस्सं च चरिमठिदिबंधो।
पढमो चरिमं पढमट्ठिदिसंतं संखगुणियकमा १८३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रथमे अवरः पल्यः प्रथमोत्कृष्टं च चरमस्थितिबंधः ।
प्रथमः चरमं प्रथमस्थितिसत्त्वं संख्यगुणितक्रमाणि ॥ १८३ ॥

सं० टी०—सर्वतः स्तोको देशसंयतस्य एकान्तवृद्धिचरमसमये संभवज्जघन्यानुभागखंडोत्करणकालः २ १। १ तस्मादपूर्वकरणप्रथमसमये संभव्युत्कृष्टानुभागखंडोत्करणकालो विशेषाधिकः २ १। ५ ॥ २। एतस्माद्देशसंयतस्यैकांत-
४
वृद्धिचरमसमयसंभविजघन्यस्थितिखण्डोत्करणकालः संख्येयगुणः २ १५। ४ ॥ ३ तस्मादपूर्वकरणप्रथमसमयसंभवदु-
४
त्कृष्टस्थितिखण्डोत्करणकालो विशेषाधिकः २ १। ५। ४।५॥४ अस्माद्देशसंयमग्रहणप्रथमसमयादारभ्य तद्विशुद्धेरे-
४। ४
कान्तवृद्धिकालः संख्येयगुणः २ १ १ ॥ ५ एतस्माद्देशसंयतस्यापूर्वकरणकालः संख्येयगुणः २ ११। ४ ॥ ६। अस्मान्मिथ्यात्वस्य सम्यग्मिथ्यात्वस्य सम्यक्त्वप्रकृतिपरिणामस्यासंयमस्य देशसंयमस्य सकलसंयमस्य च जघन्यकालः संख्येयगुणः, परस्परं तु षण्णां समानः २ १ १। ४। ४ ॥७। अस्मादपूर्वकरणप्रथमसमये प्रारब्धो देशसंयतस्य गुणश्रेण्यायामः संख्यातगुणः २ १ १। ४। ४। ४ ॥ ८ एतस्मादेकांतवृद्धिचरमसमयसंभविजघन्यस्थितिबंधाबाधाकालः संख्येयगुणः २ १ १ १ ॥ ९। एतस्मादपूर्वकरणप्रथमसमयसंभव्युत्कृष्टस्थितिबंधाबाधाकालः संख्येयगुणः—
२ १ १ १ ४ ॥ १०। एते प्रागुक्ताः सर्वेऽपि कालाः अंतर्मुहूर्तमात्राः। तस्मादेकांतवृद्धिचरमसमयसंभव्यजघन्यस्थितिखंडायामोऽसंख्यातगुणः प ॥ ११। प्राक्तनकालस्यांतर्मुहूर्तमात्रत्वेन चरमस्थितिखंडायामस्य च पल्यसंख्यातभागमात्र-
१ १
त्वेन तस्मादसंख्यातगुणितत्वसंभवात्। तस्मादपूर्वकरणप्रथमसमयसंभविजघन्यस्थितिखंडायामः संख्येयगुणः प॥ १२।
१
अस्मात्पल्यं संख्येयगुणं प ॥ १३। अस्मादपूर्वकरणप्रथमसमयसंभव्युत्कृष्टस्थितिखंडायामः संख्यातगुणः सा ७॥ १४।
८
तस्मादेकांतवृद्धिचरमसमयसंभविजघन्यस्थितिबंधः संख्येयगुणः सा अं को २॥ १५। तस्मादपूर्वकरणप्रथमसमयसंभव्यु-
४। ४। ४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्कृष्टस्थितिबंधः संख्येयगुणः सा अं को २ ॥ १६ । अस्मादेकांतवृद्धिचरमसमयसंभविजघन्यस्थितिसत्त्वं संख्येयगुणं
४ । ४

सा अं को २ ॥ १७ । एस्मादपूर्वकरणप्रथमसमयसंभवदुत्कृष्टस्थितिसत्त्वं संख्येयगुणं सा अं को २ ॥ १८ ।
४

१७८–१८३ ॥ एवमपल्बहुत्वपदानि व्याख्याय देशसंयमस्य जघन्योत्कृष्टलब्ध्यवसरं तदल्पबहुत्वं च प्रतिपादयितुमाह–

स० चं०– सर्वतैं स्तोक तौ देश संयतका एकांतवृद्धि कालका अंतविषैं संभवता जघन्य अनुभाग खंडोत्करण काल है । १ । तातैं किछू विशेषकरि अधिक अपूर्व करणका प्रथम समयविषैं संभवता उत्कृष्ट अनुभाग खंडोत्करण काल है । २ । तातैं संख्यातगुणा देश संयतका एकांत वृद्धि कालका अंतसमयविषैं संभवता जघन्य स्थिति कांडकोत्करण काल है । ३ ॥ १७८ ॥

स० चं०– तातैं किछू विशेषकरि अधिक अपूर्व करणका प्रथम समयविषैं संभवता उत्कृष्ट स्थिति खंडोत्करण काल है । ४ । तातैं संख्यातगुणा एकांतवृद्धिका काल है । ५ । तातैं संख्यातगुणा अपूर्व करणका काल है ६ ॥ १७९ ॥

स० चं०– तातैं संख्यातगुणा मिथ्यात्व अर सम्यग्मिथ्यात्व अर सम्यक्त्व मोहनी इन तीनोंका उदय काल अर असंयम अर देशसंयम अर सकल संयम इन छहोंका जघन्य काल परस्पर समान है ७ । तातैं संख्यातगुणा अपूर्व करणका प्रथम समयविषैं जाका आरंभ भया ऐसा देश संयम सम्बन्धी गुणश्रेणि आयाम है ८ ॥ १८० ॥

स० चं०– तातैं संख्यातगुणा एकांतवृद्धिका अंतसमयविषैं संभवते स्थिति बंधका जघन्य आबाधा काल है । ९ । तातैं संख्यातगुणा अपूर्व करणका प्रथम समयविषैं संभवते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितिबंधका उत्कृष्ट आबाधा काल है ।१०। इहां पर्यंत ए कहे सर्व काल ते प्रत्येक अंतर्मुहूर्तमात्र ही जानने। तातैं असंख्यातगुणा एकांतवृद्धिका अंतसमयविषैं संभवता जघन्य स्थिति कांडक आयाम है ११ ॥ १८१ ॥

स० चं०— यहु कह्या अंतविषैं संभवता जघन्य स्थिति कांडकायाम सो पल्यका संख्यातवां भाग मात्र है। तातैं पूर्वोक्त अंतर्मुहूर्त कालतैं यहु अन्त खण्ड असंख्यातगुणा कह्या है ॥ १८२ ॥

स० चं०— तातैं संख्यातगुणा अपूर्व करणका प्रथम समयविषैं संभवता जघन्य स्थिति कांडक आयाम है १२ । तातैं संख्यातगुणा पल्य है । १३ । तातैं संख्यातगुणा अपूर्व करणका प्रथम समयविषै संभवता पृथक्त्व सागर प्रमाण उत्कृष्ट स्थिति कांडकायाम है ।१४। तातैं संख्यातगुणा एकांत वृद्धिका अंतसमयविषैं संभवता ऐसा जघन्य स्थितिबंध है १५। तातैं संख्यातगुणा अपूर्व करणका प्रथम समयविषैं संभवता ऐसा उत्कृष्ट स्थितिबंध है १६। तातैं संख्यातगुणा एकांतवृद्धिका अंतसमयविषैं संभवता ऐसा जघन्य स्थिति सत्त्व है।१७। तातैं संख्यातगुणा अपूर्व करणका प्रथम समयविषैं संभवता ऐसा उत्कृष्ट स्थिति सत्त्व है १८। ॥१८३॥ ऐसैं कालका अल्प बहुत्वके स्थिति कहि देश संयमविषैं परिणामनिकी विशुद्धता रूप लब्धि ताका अल्प बहुत्व कहिए है—

अवरवरदेसलद्धी सेकाले मिच्छसंजमुववण्णे ।
अवरादु अणंतगुणा उक्कस्सा देसलद्धी दु ॥ १८४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवरवरदेशलब्धिः स्वकाले मिथ्यसंयममुपपन्ने ।
अवरादनंतगुणा उत्कृष्टा देशलब्धिस्तु ॥ १८४ ॥

सं० टी०—यो जीवः देशसंयमघातिकर्मोदयवशाद्देशसंयमात्प्रतिपतन् तत्कालचरमसमये मिथ्यात्वाभिमुखो वर्तते तस्य तत्कालचरमसमयवर्तिनो मनुष्यस्य सर्वजघन्या देशसंयमलब्धिर्भवति । यः पुनरनंतगुणविशुद्धिवृद्धया देशसंयमपरमप्रकर्षं प्राप्य तदनंतरसमये सकलसंयमं प्राप्स्यति तस्य मनुष्यस्योत्कृष्टदेशसंयमलब्धिर्भवति । एवमुक्तजघन्यदेशसंयमाविभागप्रतिच्छेदेभ्यः उत्कृष्टदेशसंयमाविभागप्रतिच्छेदा अनंतानंतगुणाः । तद्गुणकारः अनंतानंतगुणितसर्वजीवराशिप्रमाणः १६ ख ॥ १८४ ॥ अथ जघन्यदेशसंयमाविभागप्रतिच्छेदप्रमाणप्रदर्शनार्थमिदमाह—

स० चं०– जो जीव देशसंयमका घाती जो कर्म ताके उदयके वशतैं देशसंयमतैं पडता जो मिथ्यात्वके सन्मुख भया मनुष्य ताके तिस देशसंयमका अंतसमयविषैं जघन्य देशसंयम लब्धि है। बहुरि अनंतगुणी विशुद्धताकरि देशसंयमके उत्कृष्टपनाकौं पाइ अनंतर समयविषैं सकल संयमकौं प्राप्त होसी ऐसा मनुष्यकैं उत्कृष्ट देशसंयम लब्धि हो है । बहुरि जघन्य देशसंयमके अविभाग प्रतिच्छेदनितैं अनंतानंतगुणा जीवराशि प्रमाणमात्र गुणकार करि गुणित उत्कृष्ट देशसंयमके अविभाग प्रतिच्छेद हैं ॥ १८४ ॥

अवरे देसट्ठाणे होंति अणंताणि फड्ढयाणि तदो ।
छट्ठाणगदा सव्वे लोयाणमसंखछट्ठाणा ॥ १८५ ॥

अवरे देशस्थाने भवंत्यनन्तानि स्पर्धकानि ततः ।
षट्स्थानगतानि सर्वाणि लोकानामसंख्यषट्स्थानानि ॥ १८५ ॥ २३५

सं० टी०— सर्वजघन्ये प्रागुक्ते देशसंयमस्थाने अनंतानंतानि स्पर्धकान्यविभागप्रतिच्छेदाः सर्वोत्कृष्टदेशसंयमा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विभागप्रतिच्छेदेभ्योऽनंतगुणहीनाः संति । ते च जघन्यदेशसंयमाविभागप्रतिच्छेदाः अनंतानंतगुणितसर्वजीवराशिप्रमाणा इति सिद्धांतप्रतिपादिता द्रष्टव्याः । तस्मात्सर्वजघन्यदेशसंयमस्थानात्सर्वाणि सर्वोत्कृष्टपर्यंतदेशसंयमलब्धिस्थानानि षट्स्थानपतितविशुद्धिवृद्ध्या वर्धमानानि असंख्यातलोकगुणितानि भवंति एकवारषट्स्थानपतितानि देशसंयमलब्धिस्थानानि यद्येतावंति १– १– १– १– १–तदा असंख्यातलोकमात्र ≡ a वारेषु कियंति इति त्रैराशिकेन सि-

२ २ २ २ २

a a a a a

द्धानि प्रतिपर्वासंख्यातलोकभागमात्राणि । सर्वेषु पर्वसु मिलित्वाप्यसंख्यातलोकमात्राण्येव षट्स्थानपतितानि देशसंयमलब्धिस्थानानीत्यर्थः ॥ १८५ ॥ अथ देशसंयमप्रकारस्वरूपं पर्वांतरप्रमाणं च प्ररूपयितुमिदमाह—

स० चं०—सर्वतैं जघन्य पूर्वोक्त देशसंयमका स्थान ताविषै स्पर्धक कहिए अविभाग प्रतिच्छेद अनंतानंत पाइए हैं । ते उत्कृष्ट देश संयमके अविभाग प्रतिच्छेदनितैं अनंतानंत गुणे घाटि हैं तौ भी सर्व जीवराशितैं अनंत गुणे है । बहुरि इस जघन्य स्थानतैं लगाय असंख्यात लोकमात्र देश संयम लब्धिके स्थान हैं । एक जीवकैं एक कालविषैं संभवै ताका नाम स्थान जानना । ते षट्स्थानपतित वृद्धि लीएं हैं सो इनिका अनुक्रम गोम्मट्टसारका ज्ञान मार्गणा अधिकारविषैं पर्याप्त समास श्रुतज्ञानका स्थान वर्णनविषैं जैसैं कीया है तैसैं जानना सो एक अधिक सूच्यंगुलकौं पांचवार मांडि परस्पर गुणैं जो प्रमाण होइ तितने स्थाननिविषैं जो एकवार षट्स्थानपतित वृद्धि पूर्ण होइ तौ देशसंयतके असंख्यात लोक प्रमाण सर्व स्थाननिविषैं केती वार होइ ऐसैं त्रैराशिक कीएं देशसंयतके स्थाननिविषैं प्रतिपातादि पर्व कहे तिनिविषैं वा मिलिकरि सर्व स्थाननिविषैं असंख्यात लोकमात्रवार षट्स्थानपतित वृद्धि संभवै है ॥ १८५ ॥

तत्थ य पडिवायगया पडिवज्जगयात्ति अणुभयगयात्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उवरुवरिलद्धिठाणा लोयाणमसंखछट्ठाणा ॥ १८६ ॥

तत्र च प्रतिपातगता प्रतिपद्यगता इति अनुभयगता इति ॥

उपर्युपरि लब्धिस्थानानि लोकानामसंख्यषट्स्थानानि ॥ १८६ ॥

सं० टी०— तत्र तेषु संयमलब्धिस्थानेषु मध्ये कानिचित्प्रतिपातगतानि कतिचित् प्रतिपद्यमानगतानि किंयतिचिदनुभयगतानीति त्रिप्रकाराणि सर्वाण्यपि देशसंयमलब्धिस्थानानि भवंति । प्रतिपातस्थानानामुपर्यसंख्यातलोकमात्राणि षट्स्थानपतितानि देशसंयमलब्धिस्थानानि अन्तरयित्वा प्रतिपद्यमानस्थानानि भवंति । तेषामुपर्यसंख्यातलोकमात्राणि षट्स्थानानि अंतरयित्वा अनुभयस्थानानि भवंति तत्र प्रतिपातस्थानान्यसंख्यातलोकमात्राण्यपि सर्वतः स्तोकानि ≡ ə तेभ्योऽसंख्येयलोकगुणानि प्रतिपद्यमानस्थानानि ≡ ə ≡ ə तेभ्योऽसंख्यातलोकगुणान्यनुभयस्थानानि ≡ ə ≡ ə ≡ ə इति विशेषो ज्ञातव्यः ॥ १८६ ॥ अथ मनुष्यतिर्यग्जीवदेशसंयमलब्धिस्थानानां प्रतिपातादिभेदभिन्नानां जघन्योत्कृष्टस्थानावसरं प्ररूपयितुमिदमाह—

स० चं०—तहां देश संयमके स्थान तीन प्रकार हैं–प्रतिपातगत १ प्रतिपद्यमानगत १ अनुभयगत १ तहां देशसंयमतैं भ्रष्ट होतैं अंत समयविषैं संभवते जे स्थान ते प्रतिपातगत हैं बहुरि देशसंयमके प्राप्त होतैं प्रथम समयविषैं संभवते जे स्थान ते प्रतिपद्यमानगत हैं। इन विना अन्य समयनिविषैं संभवते जे स्थान ते अनुभय गत हैं। ते उपरि उपरि हैं। सोई कहिए है–

देशसंयमका जो जघन्य स्थान संभवते थोरी विशुद्धतायुक्त सो तौ नीचै ही नीचै लिख्या। ताके ऊपरि तातैं अनंतवां भागमात्र अधिक विशुद्धतायुक्त द्वितीय स्थान लिख्या ऐसैं क्रमतैं उपरि उपरि उत्कृष्ट स्थानपर्यंत रचना भई। तहां जघन्य स्थान आदि केते इक नीचेके स्थान ते तौ प्रतिपात रूप जानने। बहुरि तिनके ऊपरि जिनका कोई स्वामी नाहीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऐसे असंख्यात लोकमात्र स्थान षट्स्थानपतित वृद्धि लीएं अंतरालविषै होंइ तिनके ऊपरि प्रतिपद्यमान स्थान पाइए है। बहुरि तिनके ऊपरि असंख्यातलोकमात्र स्थान षट्स्थान पतित वृद्धि लीएं अंतरालविषै होंइ तब तिनके ऊपरि अनुभय गतस्थान पाइए है। तहां प्रतिपातस्थान थोरे हैं तेऊ असंख्यात लोकमात्र हैं अर तिनतैं असंख्यात लोकगुणे प्रतिपद्यमान स्थान हैं। अर तिनतैं असंख्यात लोक गुणे अनुभय स्थान हैं॥ १८६॥

णरातिरिये तिरियणरे अवरं अवरं वरं वरं तिसुवि।
लोयाणमसंखेज्जा छट्ठाणा होंति तम्मज्झे॥ १८७॥

नरातिराश्चि तिर्यग्नरे अवरं अवरं वरं वरं त्रिष्वपि।
लोकानामसंख्येयानि षट्स्थानानि भवंति तन्मध्ये॥ १८७॥

सं० टी०—देशसंयमस्य सर्वजघन्यं प्रतिपातस्थानं मनुष्ये संभवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानपतितानि मनुष्यसंबन्धीन्येव देशसंयमलब्धिस्थानान्युल्लंघ्य तिर्यग्जीवसंबंधिजघन्यप्रतिपातस्थानं भवति। ततः परं नरतिर्यग्जीवसाधारणान्यसंख्यातलोकमात्राणि देशसंयमलब्धिस्थानान्यतिक्रम्य तिर्यग्जीवस्योत्कृष्टप्रतिपातस्थानं जायते। ततः परमसंख्यातलोकमात्राणि देशसंयमलब्धिस्थानानि नीत्वा मनुष्यस्योत्कृष्टं प्रतिपातस्थानमुत्पद्यते। ततः परमसंख्यातलोकमात्राणि देशसंयमलब्धिस्थानानि तत्परिणामयोग्यस्वामिनामभावादंतरयित्वा मनुष्यस्य जघन्यं प्रतिपद्यमानस्थानं भवति। ततः परं मनुष्यसंभवीन्येवासंख्यातलोकमात्राणि देशसंयमलब्धिस्थानानि नीत्वा तिर्यग्जीवस्य जघन्यं प्रतिपद्यमानस्थानं भवति। ततः परमसंख्यातलोकमात्राणि नरतिर्यग्जीवसाधारणानि देशसंयमलब्धिस्थानानि गमयित्वा तिर्यग्जीवस्योत्कृष्टं प्रतिपद्यमानस्थानं जायते। ततः परमसंख्यातलोकमात्राणि मनुष्यसंबन्धीन्येव देशसंयमलब्धिस्थानान्युल्लंघ्य मनुष्यस्योत्कृष्टं प्रतिपद्यमानस्थानं भवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानपतितानि देशसंयमलब्धिस्थानानि पूर्ववदन्तरयित्वा मनुष्यस्य जघन्यमनुभयस्थानं जायते। ततः परमसंख्यातलोकमात्राणि मनुष्यसंबन्धीन्येव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देशसंयमलब्धिस्थानानि नीत्वा तिर्यग्जीवस्य जघन्यमनुभयस्थानमुत्पद्यते । ततः परं नरतिर्यग्जीवसाधारणान्यसंख्येयलोकमात्राणि देशसंयमलब्धिस्थानानि नीत्वा तिर्यग्जीवस्योत्कृष्टमनुभयस्थानमुत्पद्यते । ततः परं नरसंबन्धीन्येवासंख्यातलोकमात्राणि षट्स्थानपतितानि देशसंयमलब्धिस्थानान्यतिस्थाप्य मनुष्यस्योत्कृष्टमनुभयस्थानमुत्पद्यते । यथासंख्येन नरतिरश्चोस्तिर्यग्नरयोश्च जघन्यं जघन्यमुत्कृष्टमुत्कृष्टं च त्रिष्वपि प्रतिपातप्रतिपद्यमानानुभयस्थानेषु संभवति तेषां नरजघन्यतिर्यग्जघन्यादीनां मध्येंऽतराले षट्स्थानपतितान्यसंख्यातलोकमात्राणि देशसंयमलब्धिस्थाननि भवंतीति गाथासूत्रव्याख्यानं निरवद्यं ॥ १८७ ॥ अथ प्रतिपातादीनां लक्षणं तत्स्वामिभेदं च प्रदर्शयितुमिदमाह—

स० चं०—देश संयमका सर्वतैं जघन्य प्रतिपात स्थान मनुष्यकैं हो है। तातैं ऊपरि षट्स्थानपतित वृद्धि लीएं असंख्यात लोकमात्र प्रतिपातस्थान ऐसे हैं जे मनुष्य ही कैं होंइ तातैं परैं तिर्यचकैं संभवता जघन्य प्रतिपातस्थान होइ। तातैं ऊपरि मनुष्य वा तिर्यंच दोऊनिकैं संभवैं ऐसे असंख्यात लोक प्रमाण स्थान होइ उपरि तिर्यंचका उत्कृष्ट प्रतिपात स्थान है। तातैं परैं मनुष्य ही कैं संभवै ऐसे असंख्यात लोकमात्र स्थान होंइ उपरितन स्थित मनुष्यका उत्कृष्ट प्रतिपात स्थान है। ताके ऊपरि असंख्यात लोकमात्र स्थान ऐसे हैं जिनका कोऊ स्वामी नाहीं ते किसी जीवकैं न होंइ तिनका अंतराल करि तातैं परै मनुष्यका जघन्य प्रतिपद्यमान स्थान है तातैं पैर मनुष्यकै होइ ऐसे असंख्यात लोकमात्र स्थान होइ परैं तिर्यंचका जघन्य प्रतिपद्यमान स्थान है । तातैं परैं मनुष्य वा तिर्यंचकैं संभवते ऐसे असंख्यात लोकमात्र स्थान होंइ ऊपरि तिर्यंचका उत्कृष्ट प्रतिपद्यमान स्थान है तातैं उपरि मनुष्यहीकैं संभवते असंख्यातलोकमात्र स्थान होइ उपरि मनुष्यका उत्कृष्ट प्रतिपद्यमान स्थान है तातैं परै असंख्यातलोकमात्र स्थान ऐसे हैं जिनका कोऊ स्वामी नाहीं तिनिका अंतरालकरि परै मनुष्यका जघन्य अनुभय स्थान हो है। तातैं परै मनुष्यहींकै संभवते अ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संख्यातलोकमात्र स्थान होंइ उपरि तिर्यंचका जघन्य अनुभय स्थान है। तातैं परैं मनुष्य वा तिर्यंचकैं संभवते असंख्यातलोकमात्र स्थान होंइ उपरि तिर्यंचका उत्कृष्ट अनुभय स्थान है। तातैं परैं मनुष्यहीकैं संभवते असंख्यातलोकमात्र स्थान होंइ उपरि मनुष्यका उत्कृष्ट अनुभय स्थान हो है। ऐसैं क्रमतैं मनुष्य तिर्यंचका जघन्य अर जघन्य उत्कृष्ट अर उत्कृष्ट प्रत्येक प्रतिपात प्रतिपद्यमान अनुभय स्थानविषै संभवै हैं ते जानने। अर बीचिमैं अंतराल स्थान जानने ते स्थान असंख्यातलोकमात्र षट्स्थानपतित वृद्धि युक्त हैं। ऐसैं गाथाका अर्थ समझना ॥ १८७ ॥

पडिवाददुगवरवरं मिच्छे अयदे अणुभयगजहण्णं।
मिच्छवरविदियसमये तत्तिरियवरं तु सठाणे ॥

प्रतिपातद्विकावरवरं मिथ्ये अयते अनुभयगजघन्यं।
मिथ्यावरद्वितीयसमये तात्तिर्यग्वरं तु स्वस्थाने ॥ १८८ ॥

सं० टी०—प्रतिपातो बहिरन्तरंगकारणवशेन संयमात्प्रच्यवः। स च संक्लिष्टस्य तत्कालचरमसमये विशुद्धिहान्या सर्वजघन्यदेशसंयमशक्तिकस्य मनुष्यस्य तदनंतरसमये मिथ्यात्वं प्रतिपत्स्यमानस्य भवति। तत्र सम्यक्त्वदेशसंयमयोर्विनाशसंभवात्। तथा तिर्यग्जीवस्य जघन्यं प्रतिपातस्थानं सम्यक्त्वदेशसंयमाभ्यां प्रच्युत्य मिथ्यात्वं गमिष्यतो देशसंयमकालचरमसमये संभवति। एतच्च मनुष्यजघन्यप्रतिपातस्थानादनंतगुणविशुद्धिकं ज्ञेयं। असंख्यातलोकवारषट्स्थानपतितविशुद्धिवृद्ध्या वर्धमानत्वात्। तथा तिर्यग्जीवस्य स्वयोग्यसंक्लेशवशेन देशसंयमात्प्रच्यवमानस्य तत्कालचरमसमये उत्कृष्टं प्रतिपातस्थानमसंयतसम्यग्दृष्टिगुणस्थानं प्राप्स्यतो भवति। इदमपि तिर्यग्जघन्यप्रतिपातस्थानादनंतगुणविशुद्धिकं प्राग्वज्ज्ञेयं। तथा मनुष्यस्य देशसंयमात्प्रच्युत्य स्वयोग्यसंक्लेशवशेनानंतरं वेदकासंयतगुणस्थानं गमिष्यतः उत्कृष्टं प्रतिपातस्थानं भवति। इदमपि तिर्यगुत्कृष्ट-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिपातस्थानादनंतगुणविशुद्धिकं प्राग्वद् ज्ञेयं । मनुष्यजघन्यप्रतिपातस्थानादारभ्य तिर्यग्जीवस्यानुत्कृष्टप्रतिपातस्थानपर्यंतं संभवंति प्रतिपातस्थानानि मिथ्यात्वाभिमुखस्यैव देशसंयमकालचरमसमये द्रष्टव्यानि तिर्यगुत्कृष्टप्रतिपातस्थानादारभ्य मनुष्योत्कृष्टप्रतिपातस्थानपर्यंतं संति प्रतिपातस्थानानि असंयतसम्यक्त्वाभिमुखस्य स्वकालचरमसमये घटन्त इत्यर्थविशेषो ग्राह्यः । तिर्यगुत्कृष्टप्रतिपातस्थानान्मनुष्योत्कृष्टप्रतिपातस्थानं पूर्ववदनंतगुणविशुद्धिकं ज्ञातव्यं । तथा मनुष्यस्य पूर्वं मिथ्यादृष्टिर्भूत्वा पश्चात्सम्यक्त्वेन सह देशसंयमं प्रतिपद्यमानस्य तत्प्रथमसमये संभवज्जघन्यप्रतिपद्यमानस्थानं मनुष्योत्कृष्टप्रतिपातस्थानादनंतगुणविशुद्धिकं अंतरेऽसंख्यातलोकमात्राणि षट्स्थानान्युल्लंघ्य समुत्पादात् तथा तिर्यग्जीवस्य मिथ्यादृष्टिचरस्य सम्यक्त्वदेशसंयमौ युगपद् प्रतिपद्यमानस्य तत्प्रथमसमये वर्तमानं जघन्यं प्रतिपद्यमानस्थानं मनुष्यजघन्यप्रतिपद्यमानादनंतगुणविशुद्धिकं प्रतिपत्तव्यं । तथा तिर्यग्जीवस्य प्रागसंयतसम्यग्दृष्टिर्भूत्वा पश्चाद्देशसंयमं प्रतिपद्यमानस्य तत्प्रथमसमये संभवदुत्कृष्टप्रतिपद्यमानस्थानं तिर्यग्जघन्यं प्रतिपद्यमानस्य स्थानात्प्राग्वदनंतगुणविशुद्धिकं बोद्धव्यं । तथा मनुष्यस्यासंयतसम्यग्दृष्टिचरस्य देशसंयमं प्रतिपद्यमानस्य तत्प्रथमसमये घटमानमुत्कृष्टं प्रतिपद्यमानस्थानं तिर्यगुत्कृष्टप्रतिपद्यमानस्थानात् पूर्ववदनन्तगुणविशुद्धिकं निश्चेतव्यं । मनुष्यजघन्यप्रतिपद्यमानात्प्रभृति तिर्यगनुत्कृष्टप्रतिपद्यमानस्थानपर्यंतं संभवंति प्रतिपद्यमानस्थानानि मिथ्यादृष्टिचरस्येति ग्राह्यं । तिर्यगुत्कृष्टप्रतिपद्यमानस्थानादारभ्य मनुष्योत्कृष्टप्रतिपद्यमानस्थानपर्यंतं विद्यमानानि स्थानानि असंयतसम्यग्दृष्टिचरस्य भवंतीति ज्ञातव्यं । तथा मनुष्यस्य मिथ्यादृष्टिचरस्य सम्यक्त्वेन सह देशसंयतं प्रतिपद्य द्वितीयसमये वर्तमानस्य जघन्यमनुभयस्थानं मनुष्योत्कृष्टप्रतिपद्यमानस्थानादनंतगुणविशुद्धिकं अन्तरेऽसंख्यातलोकमात्रषट्स्थानपतितविशुद्धिवृद्ध्या वर्धमानत्वात् । तथा तिर्यग्जीवस्य मिथ्यादृष्टिचरस्य सम्यक्त्वेन सार्धं देशसंयमं प्रतिपद्य द्वितीयसमये वर्तमानस्य जघन्यमनुभयस्थानं मनुष्यजघन्यानुभयस्थानात्पूर्ववदनंतगुणविशुद्धिकं । तथा तिर्यग्जीवस्यासंयतसम्यग्दृष्टिचरस्य देशसंयमं प्रतिपद्य एकांतवृद्धिचरमसमये स्वगतियोग्यसर्वविशुद्धिविशिष्टस्योत्कृष्टमनुभयस्थानं तिर्यग्जघन्यानुभयस्थानात्प्राग्वदनंतगुणं तथा मनुष्यस्यासंयतसम्यग्दृष्टिचरस्य देशसंयमं प्रतिपद्य एकांतवृद्धिचरमसमये सर्वविशुद्धिविशिष्टस्य सकलसंयमाभिमुखस्योत्कृष्टमनुभयस्थानं तिर्यगुत्कृष्टानुभयस्थानात्प्राग्वदनन्तगुणविशुद्धिकं ग्राह्यं । मनुष्यजघन्यानुभयस्थानादारभ्य तिर्यगनुत्कृष्टानुभयस्थानपर्यंतं संभवन्ति स्थानानि मिथ्यादृष्टिचरस्येति ग्राह्यं । तिर्यगुत्कृष्टानुभयस्थानादारभ्य मनुष्योत्कृष्टानुभयस्थानपर्यंतं दृश्यमानानि स्थानानि असंयतसम्यग्दृष्टिचरस्येति संभावनीयं । प्रतिपातद्विकस्य प्रतिपातप्रतिपद्यमानयोः अवरं मिथ्यात्वे पततः मिथ्यादृष्टिचरस्य संभवति वरमुत्कृष्टं देशसंयमलब्धिस्थानसंयमे पतिष्यतः असंयत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चरस्य च संभवति। अनुभयजघन्यं मिथ्यादृष्टिचरस्य देशसंयमग्रहणद्वितीयसमये वर्तमानस्य भवति । अनुभयोत्कृष्टं तु असंयतचरस्य एकांतवृद्धिचरमसमये मनुष्यस्य सकलसंयमाभिमुखस्य तिर्यग्जीवस्य च एकांतवृद्धिचरमसमयस्वरूपस्व-कीयस्थाने एव स्थितस्य संभवतीति सूच्यते। एवं गाथासूत्रव्याख्यानमुक्तं ॥ १९८ ॥

इति देशसंयमलब्धिविधानाधिकारः समाप्तः ॥

स० चं०—प्रतिपात नाम संयमतैं भ्रष्ट होनेका है सो संक्लेश परिणामनितैं संयमतैं भ्रष्ट होतैं देश संयतका अंतसमयविषैं प्रतिपात स्थान हो है। अर प्राप्त भयाका नाम प्रतिपद्यमान स्थान है। सो देश संयतका प्रथम समयविषै प्रतिपद्यमान स्थान हो है । अर दोऊ रहितका नाम अनुभय है। सो देश संयतके इनि बिना अन्य समयनिविषैं अनुभयस्थान हो है । तहां मिथ्यात्वकौं सन्मुख मनुष्यकैं जघन्य प्रतिपात स्थानहो है अर मिथ्यात्वकौं सन्मुख तिर्यंचकैं जघन्य प्रतिपात स्थान हो है। अर असंयतकौं सन्मुख तिर्यंचकैं उत्कृष्ट प्रतिपातस्थान हो है। अर असंयतकौं सन्मुख मनुष्यकैं उत्कृष्ट प्रतिपात स्थान हो है। अर मिथ्यात्वतैं चढ्या तिर्यंचकैं जघन्य प्रतिपद्यमान स्थान हो है। अर मिथ्यादृष्टितैं भया देशसंयतका दूसरा समयविषैं मनुष्यकैं जघन्य अनुभय स्थान हो है। अर मिथ्यादृष्टितैं भया देश संयतका दूसरा समयविषैं तिर्यंचकैं जघन्य अनुभय स्थान हो है। अर असंयततैं भया देश संयतकैं एकांत वृद्धिका अंतसमयविषैं तिर्यंचकैं उत्कृष्ट अनुभय स्थान हो है। अर असंयततैं भया देश संयतकैं एकांत वृद्धिका अंत-समय विषैं सकल संयमकौं सन्मुख मनुष्यकैं उत्कृष्ट स्थान हो है।

ए बारह स्थानक कहे तिनविषै पूर्व २ स्थानकी विशुद्धतातैं उत्तर उत्तर स्थान-विषै असंख्यातलोकबार भई जो षट्स्थानपतितवृद्धि ताकरि वर्धमान ऐसी अनंतगुणी विशुद्धता क्रमतैं जाननी। बहुरि इतना जानना—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिपात स्थाननिविषैं मनुष्यका जघन्यतैं लगाय तिर्यंचका अनुत्कृष्ट स्थान पर्यंत जे स्थान हैं ते तौ मिथ्यात्वकौं संमुख जीवहीकैं होंइ। अर तिर्यंचका उत्कृष्टतैं लगाय मनुष्यका उत्कृष्ट पर्यंत जे स्थान हैं ते असंयतका सन्मुख जीवकैं ही हो हैं। बहुरि प्रतिपद्यमान स्थाननिविषै मनुष्यका जघन्यतैं लगाय तिर्यंचका अनुत्कृष्ट पर्यंत जे स्थान हैं ते तौ मिथ्यादृष्टितैं देशसंयत भया ताहीकैं होंइ अर तिर्यंचका उत्कृष्टतैं लगाय मनुष्यका उत्कृष्टपर्यंत जे स्थान हैं ते असंयततैं देशसंयत भया ताकैं होंइ। बहुरि अनुभय स्थाननिविषैं मनुष्यका जघन्यतैं लगाय तिर्यंचका अनुत्कृष्ट पर्यंत जे स्थान है ते तौ मिथ्यादृष्टितैं भया देश संयतहीकैं होंइ। अर तिर्यंचका उत्कृष्ट तैं लगाय मनुष्यका उत्कृष्ट पर्यंत जे स्थान हैं ते असंयततैं भया देश संयतहीकैं होंइ॥ १८८॥

इति देशचारित्राभिधानप्ररूपणं समाप्तं॥

अथ सकलचारित्रप्ररूपणमुपक्रममाण इदं सूत्रमाह—

अथ सकल चारित्रकौं प्ररूपैं हैं—

सयलचरित्तं तिविहं खयउवसमि उवसमं च खइयं च।
सम्मत्तुप्पत्तिं वा उवसमसम्मेण गिण्हदो पढमं॥

सकलचारित्रं त्रिविधं क्षायोपशमिकं औपशमिकं च क्षायिकं च।
सम्यक्त्वोत्पत्तिमिव उपशमसम्येन गृह्णन् प्रथमम्॥ १८९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०—सकलचारित्रं त्रिविधं क्षायोपशमिकमुपशमजं क्षायिकं चेति। तत्र प्रथमं क्षायोपशमिकचारित्रमुपशमज-सम्यक्त्वेन सह गृह्णतो जीवस्य प्रथमोपशमसम्यक्त्वोत्पत्तौ यथा प्रक्रिया प्रागुक्ता तथा अत्रापि निरवशेषं वक्तव्या॥ १८९॥ अथ वेदकयोग्यमिथ्यादृष्ट्यादीनां सकलसंयमं गृह्णतां प्रक्रियाविशेषप्रदर्शनार्थमिदमाह—

स० चं०—सकल चारित्र तीन प्रकार है—क्षायोपशमिक १ औपशमिक २ क्षायिक ३। तहां पहला क्षायोपशमिक चारित्र सातवें वा छठे गुणस्थानविषैं पाइए है ताकौं जो जीव उपशम सम्यक्त्व सहित ग्रहण करै है सो मिथ्यात्वतैं ग्रहण करै है ताका तौ सर्व विधान प्रथमोपशम सम्यक्त्वकी उत्पत्तिविषैं कह्या है सो जानना। क्षायोपशम चारित्रकौं ग्रहता जीव पहलैं अप्रमत्त गुणस्थानकौं प्राप्त हो है॥ १८९॥

वेदगजोगो मिच्छो अविरददेसो य दोण्णिकरणेण।
देसवदं वा गिण्हदि गुणसेढी णत्थि तक्करणे॥

वेदकयोगो मिथ्यो अविरतदेशश्च द्विकरणेन।
देशव्रतमिव गृह्णाति गुणश्रेणी नास्ति तत्करणे॥ १९०॥

सं० टी०—वेदकसम्यक्त्वग्रहणयोग्यो मिथ्यादृष्टिर्वा वेदकसम्यग्दृष्टिरविरतो वा देशव्रती वा देशव्रतग्रहण-वदधःप्रवृत्तापूर्वकरणद्वयपरिणामैरेव सकलसंयमं गृह्णाति। तत्करणद्वयेऽपि गुणश्रेणी नास्ति सकलसंयमग्रहणप्रथमस-मयादारभ्य गुणश्रेण्यस्ति॥ १९०॥ इतः परं देशसंयमवदेवात्रापि प्रक्रिया भवतीत्यतिदेशार्थमिदमाह—

स० चं०—वेदक सम्यक्त्व सहित क्षायोपशम चारित्रकौ मिथ्यादृष्टि वा अविरत वा देश संयत जीव है सो देशव्रत ग्रहणवत् अधःप्रवृत्त वा अपूर्व करण इन दोय ही करणकरि ग्रहै है। तहां करणविषै गुणश्रेणि नाहीं है। सकल संयमका ग्रहण समयतैं लगाय गुणश्रेणि हो है॥ १९०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एत्तो उवरिं विरदे देसो वा होदि अप्पबहुगोत्ति ।
देसोत्ति य तट्ठाणे विरदो त्ति य होदि वत्तव्वं ॥

अत उपरि विरते देश इव भवति अल्पबहुकत्वमिति ।
देश इति तत्स्थाने विरत इति च भवति वक्तव्यम् ॥ १९१ ॥

सं० टी०— इतः परमल्पबहुत्वपर्यंतं देशसंयते यादृशी प्रक्रिया तादृश्येवात्रापि सकलसंयते भवतीति ग्राह्यं । अयं तु विशेषः— यत्र यत्र देशसंयत इत्युच्यते तत्र तत्र स्थाने विरत इति वक्तव्यं भवति । तद्यथा—

अधःप्रवृत्तकरणादीनां कालाल्पबहुत्वं सम्यक्त्वोत्पत्तिवत् स्थितिखंडसहस्रेषु गतेष्वपूर्वकरणकालः समाप्यते तदनंतरसमये सकलसंयतः सन् असंख्यातसमयप्रबद्धद्रव्यमपकृष्यावस्थितिगुणश्रेणिं पूर्ववत्करोति । एवं प्रतिसमयमसंख्यातगुणक्रमेण द्रव्यमपकृष्य एकांतवृद्धिचरमसमयपर्यंतमवस्थितगुणश्रेणिं करोति । तत्काले बहुषु स्थितिकांडकसहस्रेषु गतेषु तदनंतरसमयादारभ्य स्वस्थानसकलसंयतो भवति । तत्र स्वस्थानसकलसंयतकाले स्थित्यनुभागकांडकघातो नास्ति गुणश्रेणी पुनरवस्थितायामा सकलसंयमनिबंधना प्रवर्तत एव । तदा संक्लेशस्तोकवशेन सकलसंयमात्प्रच्युत्यासंयतगुणस्थानं गत्वा तत्र कर्मस्थितिमवर्धयित्वा शीघ्रांतर्मुहूर्तेन पुनः संयमं प्रतिपद्यमानस्याधःप्रवृत्तापूर्वकरणपरिणामः स्थित्यनुभागखंडनं च नास्ति । यस्तीव्रसंक्लेशेन सकलसंयमात्प्रच्युत्य मिथ्यात्वं गत्वा तत्र दीर्घमंतर्मुहूर्तं वा चिरकालं वा स्थित्वा स्थित्यनुभागौ वर्धयित्वा पुनर्वेदकसम्यक्त्वेन सह सकलसंयमं गृह्णाति तस्याधःप्रवृत्तापूर्वकरणद्वयं स्थित्यनुभागखंडनं च विद्यत एव । तदा विशुद्धिसंक्लेशपरावृत्तिवशेन स्वस्थानसकलसंयतः असंख्यातभागाधिकं संख्यातभागाधिकं संख्यातगुणमसंख्यातगुणं वा असंख्यातभागहीनं संख्यातभागहीनं संख्यातगुणहीनमसंख्यातगुणहीनं वा द्रव्यमपकृष्यावस्थितायामां गुणश्रेणिं करोत्येव । जघन्यानुभागखंडोत्करणकालः सर्वतः स्तोकमित्यादिषु देशपदस्थाने विरतपदं निक्षिप्याल्पबहुत्वपदान्यष्टादशापि पूर्ववद् व्याख्येयानि ॥ १९१ ॥ अथ सर्वजघन्यसकलसंयमविशुद्ध्यविभागप्रतिच्छेदप्रमाणप्रदर्शनपूर्वकं तत्सर्वस्थानसंख्यानं प्ररूपयितुमिदमाह—

स० चं०—इहांतैं ऊपरि अल्प बहुत्व पर्यंत जैसैं पूर्वैं देश विरताविषै व्याख्यान किया है २३७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तैसें सर्व व्याख्यान इहां जानि। विशेष इतना—वहां जहां देश विरत कह्या है इहां तहां सकल विरत कहना सो कहिए है। अधःप्रवृत्त करणादिकके कालका अल्पबहुत्व अर प्रथमोपशम सम्यक्त्ववत् जो हजारों स्थितिखंड भएं अपूर्व करणकौं समाप्तकरि अनंतर समयविषैं सकल संयमविषै संयमकौं ग्रहै तहां प्रथम समयतैं लगाय एकांत वृद्धिका अंतसमय पर्यंत समय समय असंख्यातगुणा ऐसा असंख्यात समयप्रबद्ध प्रमाण द्रव्यकौं ग्रहि अवस्थिति गुणश्रेणि करै है। तहां बहुत स्थितिकांडक भएं एकांत वृद्धिका अंतसमय पीछैं अनंतर समयतैं लगाय स्वस्थान सकल संयमी हो है। तहां स्थिति अनुभाग कांडकका घात नाहीं है। गुणश्रेणि है ही। जो जीव सकल संयमतैं भ्रष्ट होइ शीघ्र ही सकल संयमकौं प्राप्त होइ ताकैं करण वा स्थिति कांडकादि न हो है। अर जो सकल संयमतैं भ्रष्ट होइ मिथ्यात्वकौं प्राप्त होइ तहां बडा अंतर्मुहूर्त वा बहुत काल रहि स्थिति अनुभाग बधाय बहुरि वेदक सम्यक्त्व सहित सकल संयमकौं ग्रहै है ताकैं दोय करण वा स्थितिकांडक घातादि हो हैं। बहुरि स्वस्थान सकल संयम विशुद्धताकी वृद्धि हानितैं चतुःस्थान पतित वृद्धि हानि लीएं द्रव्यकौं अपकर्षण करि समय समय गुणश्रेणि करै है। बहुरि जघन्य अनुभाग खंडोत्करण कालादिक अठारह स्थाननिविषैं पूर्वोक्तवत् तहां अल्प बहुत्व जानना ॥ १९१ ॥

अवरे विरदट्ठाणे होंति अणंताणि फड्ढयाणि तदो ।
छट्ठाणगया सव्वे लोयाणमसंख छट्ठाणा ॥ १९२ ॥

अवरे विरतस्थाने भवंत्यनंतानि स्पर्धकानि ततः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षट्स्थानगतानि सर्वाणि लोकानामसंख्यं षट्स्थानानि ॥ १९२ ॥

सं० टी०— सकलसंयमस्य सर्वजघन्यस्थाने अनंतानंतानि स्पर्धकान्यविभागप्रतिच्छेदाः जीवराश्यनंतगुणप्रमिताः संति। ततः परं सर्वोत्कृष्टस्थानपर्यंतं षट्स्थानपतितवृद्धीनि सकलसंयमलब्धिस्थानानि सर्वाण्यपि असंख्यातलोकमात्राणि भवंति ॥ १९२ ॥ सकलसंयमस्य प्रतिपातादिभेदं दर्शयितुमिदमाह—

स० चं०— सकल संयमका जघन्य स्थाननिविषैं अनंतानंत स्पर्धक कहिए अविभाग प्रतिच्छेद हैं ते जीवराशितैं अनंत गुणे जानने। तातैं गोम्मटसारका ज्ञानाधिकारविषैं पर्याय समासके स्थाननिका अनुक्रम जैसैं कह्या है तैसै षट्स्थानपतित वृद्धि लीएं असंख्यात लोकमात्र स्थान हैं तिनविषैं असंख्यात लोकमात्रबार षट्स्थानपातित वृद्धि संभवै है ॥१९२॥

तत्थ य पडिवादगया पडिवज्जगयात्ति अणुभयगयात्ति
उवरुवरि लद्धिठाणा लोयाणमसंखछट्ठाणा ॥१९३॥

तत्र च प्रतिपातगता प्रातिपद्यगता इति अनुभयगता इति।
उपर्युपरि लब्धिस्थानानि लोकानामसंख्यषट्स्थानानि ॥

सं० टी०— तत्र प्रतिपातगतानि प्रतिपद्यमानगतान्यनुभयगतानीति त्रिविधानि सकलसंयमलब्धिस्थानानि प्रत्येकमसंख्यातलोकमात्राण्युपर्युपरि तिष्ठंति ॥ १९३ ॥ तेषु प्रतिपातस्थानभेदं प्रदर्शयितुमिदमाह—

स० चं०—तहां प्रतिपातगत १ प्रतिपद्यमानगत २ अनुभयगत ३ ऐसैं उपरि तीन प्रकार स्थान हैं। भावार्थ यहु—नीचैं ही नीचै तौ जघन्य स्थान लिख्या ताकै ऊपरि अनंतभागवृद्धि रूप द्वितीय स्थान लिख्या ताके ऊपरि अनंत भाग वृद्धिरूप तृतीय स्थान लिख्या। ऐसैं पर्याय समास श्रुत ज्ञानके स्थानवत् स्थाननिकी अनुक्रमतैं ऊपरि ऊपरि रचना करनी। इहां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनंत भागादिक वृद्धि विशुद्धताकी अपेक्षा जाननी तहां नीचेके स्थान प्रतिपातगत हैं। प्रतिपद्यमान तिनके ऊपरि हैं। अनुभय गत तिनके भी ऊपरिवर्ती हैं। ते प्रत्येक असंख्यातलोकमात्र हैं। तहां असंख्यातलोकमात्रबार षट्स्थानपतित वृद्धि संभवै है॥ १९३॥

पडिवादगया मिच्छं अयदे देसे य होंति उवरुवरिं।
पत्तेयमसंखमिदा लोयाणमसंखछट्ठाणा॥ १९४॥

प्रतिपातगतानि मिथ्ये अयते देशे च भवंति उपर्युपरि।
प्रत्येकमसंख्यमितानि लोकानामसंख्यषट्स्थानानि॥ १९४॥

सं॰ टी॰— मिथ्यात्वे प्रतिपाताभिमुखं सकलसंयमलब्धिस्थानं चरमसमये तीव्रसंक्लेशवशात्सर्वजघन्यं भवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानानि गत्वा तद्योग्यसंक्लेशवशेन मिथ्यात्वप्रतिपाताभिमुखं सकलसंयमलब्धिस्थानमुत्कृष्टं तच्चरमसमये भवति ततः परमसंख्यातलोकमात्राणि षट्स्थानान्यंतरयित्वाऽसंयमप्रतिपाताभिमुखं जघन्यं सकलसंयमलब्धिस्थानं चरमसमये तद्योग्यसंक्लेशवशेन भवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानानि गत्वा असंयमप्रतिपाताभिमुखसकलसंयमलब्धिस्थानमुत्कृष्टं तच्चरमसमये तद्योग्यसंक्लेशवशाद् भवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानान्यतीत्य तद्योग्यसंक्लेशाद्देशसंयमप्रतिपाताभिमुखं जघन्यं सकलसंयमलब्धिस्थानं तच्चरमसमये भवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानानि गत्वा तद्योग्यसंक्लेशवशेन देशसंयमप्रतिपाताभिमुखमुत्कृष्टं सकलसंयमलब्धिस्थानं तच्चरमसमये भवति। एवं प्रतिपातस्थानानि तद्विषयस्वामिभेदात्त्रिविधानि। तत्र त्रीणि जघन्यानि तीव्रसंक्लेशाविष्टस्य भवंति। त्रीण्युत्कृष्टानि तद्योग्यमंदसंक्लेशाविष्टस्य भवंति॥ १९४॥ अथ प्रतिपद्यमानसकलसंयमलब्धिस्थानस्वामिभेदावधारणार्थमिदमाह—

स॰ चं॰—तहां प्रतिपात गत स्थान सकल संयमतैं भ्रष्ट होतैं ताका अंतसमयविषैं पाइए हैं। तहां जघन्यतैं लगाय असंख्यातलोकमात्र स्थान तौ मिथ्यात्वकौं जो सन्मुख

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

होइ तिनकैं होइ। तिनके ऊपरि असंख्यातलोकमात्र स्थान जे जीव असंयतकौं सन्मुख होंइ तिनकैं हो हैं। तिनके ऊपरि असंख्यातलोकमात्र स्थान जे जीव देशसंयतकौं सन्मुख होंइ तिनके हो हैं। ऐसैं प्रतिपात स्थान तीन प्रकार हैं। तहां तीनों जायगा जघन्य स्थान तौ यथायोग्य तीव्र संक्लेशवालाकैं अर उत्कृष्ट स्थान मंद संक्लेशवालाकैं हो हैं। बहुरि एक एक विषैं असंख्यात लोकमात्र षट्स्थान संभवै हैं॥ १९४॥

तत्तो पडिवज्जगया अज्जमिलेच्छे मिलेच्छअज्जे य।
कमसो अवरं अवरं वरं वरं होदि संखं वा॥ १९५॥

ततः प्रतिपद्यगता आर्यम्लेच्छे म्लेच्छार्ये च।
क्रमशोऽवरमवरं वरं वरं भवति संख्यं वा॥ १९५॥

सं॰ टी॰— तस्माद्देशसंयमप्रतिपाताभिमुखोत्कृष्टप्रतिपातस्थानादसंख्येयलोकमात्राणि षट्स्थानान्यंतरयित्वा मिथ्यादृष्टिचरस्यार्यखंडजमनुष्यस्य सकलसंयमग्रहणप्रथमसमये वर्तमानं जघन्यं सकलसंयमलब्धिस्थानं भवति। ततः परमसंख्येयलोकमात्राणि षट्स्थानान्यतिक्रम्य म्लेच्छभूमिजमनुष्यस्य मिथ्यादृष्टिचरस्य संयम ग्रहणप्रथमसमये वर्तमानं जघन्यं संयमलब्धिस्थानं भवति। ततः परमसंख्येयलोकमात्राणि षट्स्थानानि गत्वा म्लेच्छभूमिजमनुष्यस्य देशसंयतचरस्य संयमग्रहणप्रथमसमये उत्कृष्टं संयमलब्धिस्थानं भवति। ततः परमसंख्येयलोकमात्राणि षट्स्थानानि गत्वा आर्यखण्डजमनुष्यस्य देशसंयतचरस्य संयमग्रहणप्रथमसमये वर्तमानमुत्कृष्टं सकलसंयमलब्धिस्थानं भवति। एतान्यार्यम्लेच्छमनुष्यविषयाणि सकलसंयमग्रहणप्रथमसमये वर्तमानानि संयमलब्धिस्थानानि प्रतिपद्यमानस्थानानीत्युच्यन्ते। अत्रार्यम्लेच्छमध्यमस्थानानि मिथ्यादृष्टिचरस्य वा असंयतसम्यग्दृष्टिचरस्य वा देशसंयतचरस्य वा तदनुरूपविशुद्ध्या सकलसंयमं प्रतिपद्यमानस्य संभवंति। विधिनिषेधयोर्नियमावचने संभवप्रतिपत्तिरिति न्यायसिद्धत्वात्। अत्र जघन्यद्वयं यथायोग्यतीव्रसंक्लेशाविष्टस्य, उत्कृष्टद्वयं तु मन्दसंक्लेशाविष्टस्येति ग्राह्यं। म्लेच्छभूमिजमनुष्याणां सकलसंयमग्रहणं कथं सं-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवतीति नाशंकितव्यं दिग्विजयकाले चक्रवर्तिना सह आर्यखण्डमागतानां म्लेच्छराजानां चक्रवर्त्यादिभिः सह जातवैवाहिकसंबन्धानां संयमप्रतिपत्तेरविरोधात् । अथवा तत्कान्यकानां चक्रवर्त्यादिपरिणीतानां गर्भेषूत्पन्नस्य मातृपक्षापेक्षया म्लेच्छव्यपदेशभाजः संयमसंभवात् तथाजातीयकानां दीक्षार्हत्वे प्रतिषेधाभावात् ॥ १९५ ॥ अनुभयस्थानप्रतिपादनार्थमाह—

स० चं०—प्रतिपात स्थाननिके ऊपरि असंख्यातलोकमात्र स्थान ऐसे हो हैं जिनिका कोऊ स्वामी नाहीं तिनिका अंतरालकरि प्रतिपद्यमान स्थान हो हैं। सो सकल संयमकी प्राप्तिका प्रथम समयविषैं जे संभवैं ते प्रतिपद्यमान स्थान जानना। तहां प्रथम आर्यखंडका मनुष्य मिथ्यादृष्टितैं सकल संयमी भया ताकैं जघन्य स्थान हो है। बहुरि ताके ऊपरि असंख्यातलोकमात्र षट्स्थान जाय म्लेच्छ खंडका मनुष्य मिथ्यादृष्टितैं सकल संयमी भया ताका जघन्य स्थान हो है। ताके ऊपरि असंख्यातलोकमात्र षट्स्थान जाइ म्लेच्छ खंडका मनुष्य देश संयततैं सकल संयमी भया ताका उत्कृष्ट स्थान हो है। बहुरि तातैं असंख्यातलोकमात्र षट्स्थान जाइ आर्य खंडका मनुष्य देश संयततैं सकल संयमी भया ताका उत्कृष्ट स्थान हो है। इहां असंख्यात लोकमात्र षट्स्थान जाइ कह्या तहां असंख्यात लोकमात्र षट्स्थान पतित वृद्धि जाननी। बहुरि इहां आर्य म्लेच्छके जघन्य अर मध्यके बीचिके जे स्थान हैं ते मिथ्यादृष्टितैं वा असंयततैं वा देशसंयततैं सकल संयमी भए तिनके यथासंभव जानने। जातैं किछू नियम कह्या नाहीं।

बहुरि इहां कोऊ कहै कि म्लेच्छ खंडका उपज्या मनुष्यकैं सकल संयम इहां कह्या सो कैसे संभवै? ताका समाधान—जो म्लेच्छ मनुष्य चक्रवर्तीका साथि आर्यखंडविषैं आवै अर तिनसेती चक्रवर्ती आदिककैं विवाहादि संबंध पाइए है तिनकैं दीक्षाका ग्रहण संभवै है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथवा म्लेच्छकी कन्या जे चक्रवर्ती आदि परणैं तिनके जे पुत्र होंइ तिनकौं माता पक्षकरि म्लेच्छ कहिए, तिनके दीक्षा ग्रहण संभवै है ॥ १९५ ॥

तत्तोणुभयट्ठाणे सामाइयछेदजुगलपरिहारे ।
पडिबद्धा परिणामा असंखलोगप्पमा होंति १९६

ततोनुभयस्थाने सामायिकछेदयुगलपरिहारे ।
प्रतिबद्धाः परिणामा असंख्यलोकप्रमा भवंति ॥ १९६ ॥

सं० टी०— तस्मादार्यखण्डमनुष्यस्य प्रतिपद्यमानोत्कृष्टसंयमलब्धिस्थानादसंख्येयलोकमात्राणि षट्स्थानान्यंतरयित्वा सामायिकछेदोपस्थापनसंयमद्वयसंबंधिजघन्यमनुभयस्थानं मिथ्यादृष्टिचरस्य संयमग्रहणाद्द्वितीयसमये भवति । ततः परमसंख्येयलोकमात्राणि षट्स्थानानि गत्वा परिहारविशुद्धिसंयमसंबंधि जघन्यसंयमलब्धिस्थानं, परिहारविशुद्धिसंयमात्प्रच्युत्य तच्चरमसमये वर्तमानस्य सामायिकछेदोपस्थापनसंयमयोः पतिष्यतो भवति । ततः परमसंख्येयलोकमात्राणि षट्स्थानानि गत्वा परिहारविशुद्धिसंयमस्योत्कृष्टं संयमलब्धिस्थानं सर्वविशुद्धस्य भवति । ततः परमसंख्येयलोकमात्राणि षट्स्थानानि गत्वा सामायिकछेदोपस्थापनसंयमयोरुत्कृष्टमनुभयस्थानमनिवृत्तिकरणक्षपकस्य चरमसमये भवति एवं मिथ्यात्वप्रतिपाताभिमुखसर्वजघन्यस्थानादारभ्यानुभयोत्कृष्टसंयमलब्धिस्थानपर्यंतं यावंति संयमलब्धिस्थानानि तावंति सर्वाण्यपि सामायिकछेदोपस्थापनसंयमद्वयसंबन्धीनीति ज्ञातव्यं । तानि चोत्तरमनन्तगुणविशुद्धीनि । तत्र प्रतिपातस्थानान्यसंख्यातलोकमात्राणि सर्वतः स्तोकानि ≡ ३ (६।९) तेभ्यः प्रतिपद्यमानस्थानान्यसंख्येयलोकगुणितानि ≡ ३ ८ (९।९) तेभ्योऽनुभयस्थानान्यसंख्यातलोकगुणितानि ≡ ३ ८ (६) सर्वाण्यपि संयमलब्धिस्थानानि मिलित्वासंख्येयलोकमात्राणि ≡ ३ भागहारभूतासंख्यातलोकस्य संदृष्टिः ९ ॥ १९६ ॥ अथ सूक्ष्मसांपराययथाख्यातचारित्रप्ररूपणार्थमिदमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—तिस उत्कृष्ट प्रतिपद्यमान स्थानके ऊपरि असंख्यातलोकमात्र स्थान ऐसें हैं जिनिका कोऊ स्वामी नाहीं तिनका अंतरालकरि उपरि अनुभय स्थान है सो पूर्वोक्त दोऊ विना अन्य समयनिविषैं जे संभवैं ते अनुभय स्थान हैं। तहां प्रथम मिथ्यादृष्टितैं सकल संयमी भया ताकैं दूसरा समयविषैं सामायिक छेदोपस्थापन संबंधी जघन्य स्थान हो है। ताके ऊपरि असंख्यातलोकमात्र षट्स्थान जाइ परिहार विशुद्धिका जघन्य स्थान हो है। सो यहु स्थान तिस परिहार विशुद्धि संयमतैं छूटि सामायिक छेदोपस्थापनकौं सन्मुख होतैं ताका अंत समयविषैं हो है । इहां इस संयमतैं छूटि सकल संयमी ही रह्या तातैं याकौं सकल संयमकी अपेक्षा अनुभय स्थान कह्या, प्रतिपात स्थान न कह्या । बहुरि ताके ऊपरि असंख्यातलोकमात्र षट्स्थान जाइ परिहार विशुद्धिका उत्कृष्ट स्थान हो है बहुरि ताके ऊपरि असंख्यातलोकमात्र षट्स्थान जाइ सामायिक छेदोपस्थापनका उत्कृट स्थान हो है। सो यहु क्षपक अनिवृत्ति करणका अंत समयविषैं संभवै है ऐसा जानना। ऐसैं जघन्यतैं लगाय उत्कृष्ट पर्यंत कहे जे अनुभय स्थान ते सर्व सामायिक छेदोपस्थापनसंबंधी संभवै हैं। परिहारविशुद्धिसंबंधी स्थान कहे ते सामायिक छेदोपस्थापनविषैं भी अर तहां भी संभवै हैं। ऐसा जानना। बहुरि ऐसे ए स्थान कहे तिनिविषैं प्रतिपात स्थान थोरे हैं तेऊ असंख्यात लोक मात्र हैं। तिनितैं असंख्यात लोक गुणे प्रतिपद्यमान स्थान है। तिनतैं असंख्यात लोक गुणें अनुभय स्थान हैं। इनि सबनिकौं मिलाएं भी असंख्यातलोक प्रमाण ही सकल संमयके स्थान हो हैं जातैं असंख्यातके भेद बहुत हैं॥ १९६॥

तत्तो य सुहुमसंजम पडिवज्जय संखसमयमेत्ता हु। २४४

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्तो दु जहाखादं एयविहं संजमे होदि॥ १९७॥

ततश्च सूक्ष्मसंयमं प्रतिवर्ज्य संख्यसमयमात्रा हि।
ततस्तु यथाख्यातमेकविधं संयमे भवति ॥ १९७ ॥

सं० टी०— तस्मादनिवृत्तकरणक्षपणचरमसमयसंभविसामायिकछेदोपस्थापनद्वयोत्कृष्टस्थानादसंख्येयलोकमात्राणि षट्स्थानान्यंतरयित्वा उपशमश्रेण्यामवरोहतो अनिवृत्तिकरणाभिमुखं सूक्ष्मसांपरायसंयमस्य जघन्यं स्थानं तच्चरमसमये भवति। ततः परमसंख्यातसमयमात्रस्थानानि गत्वा सूक्ष्मसांपरायक्षपकचरमसमये सूक्ष्मसांपरायसंयमस्योत्कृष्टं स्थानं भवति। तस्मादसंख्येयलोकमात्राणि षट्स्थानान्यंतरयित्वा यथाख्यातचारित्रमेकमिदं सर्वस्थानेभ्योऽनंतविशुद्धिकं सकलसंयमोत्कृष्टमुपशांतकषायक्षीणकषायसयोगकेवल्ययोगकेवलिस्वामिकं भवति सकलचारित्रमोहनीयप्रकृतीनां प्रकृतिस्थित्यनुभागप्रदेशरूपाणां सर्वोपशमात्सर्वक्षयाच्च समुद्भूतत्वात्तस्य जघन्यमध्यमोत्कृष्टस्थानविकल्पा न संतीत्येकविधत्वं प्रवचने प्रतिपादितं ॥ १९७ ॥ अथ सामायिकादिसंयमानां प्रतिपातस्थानादिलक्षणस्थानसंख्यांतरस्थानसंख्यास्वामिविषयविभागप्रदर्शनार्थं गाथासप्तकमाह—

स० चं०—तिस सामायिक छेदोपस्थापनका उत्कृष्ट स्थानतैं उपरि असंख्यतालोकमात्र स्थाननिका अंतरालकरि उपशम श्रेणितैं उतरतैं अनिवृत्तिकरणके सन्मुख जीवकै अपना अंत समयविषैं संभवता ऐसा सूक्ष्मसांपरायका जघन्य स्थान हो है। ताके ऊपरि असंख्यात समयमात्र स्थान जाइ क्षपक सूक्ष्म सांपरायका अंत समयविषैं संभवता सूक्ष्मसांपरायका उत्कृष्ट स्थान हो है। तातैं उपरि असंख्यातलोकमात्र स्थाननिका अंतरालकरि यथाख्यात चारित्रका एक स्थान हो है। सो यहु सवनितैं अनंतगुणी विशुद्धता लीएं उपशांतकषाय क्षीणकषाय सयोगी अयोगीकैं हो है। यामैं सर्व कषायनिका सर्वथा उपशम वा क्षय है तातैं जघन्य मध्य उत्कृष्ट भेद ही नाही ॥ १९७ ॥ २४५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पडचरिमे गहणादीसमये पडिवाददुगमणुभयं तु।
तम्मज्झे उवरिमगुणगहणाहिमुहे य देसं वा १९८

पतनचरमे ग्रहणादिसमये प्रतिपातद्विकमनुभयं तु।
तन्मध्ये उपरिगुणग्रहणाभिमुखे च देशमिव ॥१९८॥

पडिवादादीतिदयं उवरुवरिमसंखलोगगुणिदकमा।
अंतरछक्कपमाणं असंखलोगा हु देसं वा ॥१९९॥

प्रतिपातादित्रितयं उपर्युपरितनमसंख्यलोकगुणितक्रमं।
अंतरषट्कप्रमाणमसंख्यलोका हि देशमिव ॥ १९९ ॥

मिच्छयददेसभिण्णे पडिवादट्ठाणगे वरं अवरं।
तप्पाउग्गकिलिट्ठे तिव्वकिलिट्ठे कमे चरिमे २००

मिथ्यायतदेशाभिन्ने प्रतिपातस्थानके वरमवरम्।
तत्प्रायोग्यक्लिष्टे तीव्रक्लिष्टे क्रमेण चरमे ॥ २००॥

पडिवज्जजहण्णदुगं मिच्छे उक्कस्सजुगलमविदेसे।
उवरिं सामइयदुगं तम्मज्झे होंति परिहारा ॥२०१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिपद्यजघन्यद्विकं मिथ्ये उत्कृष्टयुगलमपि देशे ।
उपरि सामायिकद्विकं तन्मध्ये भवंति परिहाराणि ॥ २०१ ॥

परिहारस्स जहण्णं सामायियदुगे पडंत चरिमम्हि ।
तज्जेट्ठं सट्ठाणे सव्वविसुद्धस्स तस्सेव ॥२०२॥

पारिहारस्य जघन्यं सामायिकद्विके पततः चरमे ।
तज्ज्येष्ठं स्वस्थाने सर्वविशुद्धस्य तस्यैव ॥ २०२ ॥

सामायियदुगजहण्णं ओघं अणियट्टिखवगचरिमम्हि ।
चरिमाणियट्टिस्सुवरिं पडंत सुहुमस्स सुहुमवरं ॥

सामायिकद्विकजघन्यमोघं अनिवृत्तिक्षपकचरमे ।
चरमानिवृत्तेरुपरि पततः सूक्ष्मस्य सूक्ष्मवरम् ॥

खवगसुहुमस्स चरिमे वरं जहाखादमोघजेट्ठं तं ।
पडिवाददुगा सव्वे सामाइयछेदपडिबद्धा ॥२०४॥

क्षपकसूक्ष्मस्य चरमे वरं यथाख्यातमोघज्येष्ठं तत् ।
प्रतिपातद्विकं सर्वाणि सामायिकच्छेदप्रतिबद्धानि ॥ २०४ ॥

सं० टी०— प्रतिपातप्रतिपद्यमानस्थानद्विकं यथासंख्यं पतच्चरमसमये संयमग्रहणप्रथमसमये च भवति । अनुभय-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थानं तयोः प्रतिपातस्थानप्रतिपद्यमानस्थानयोर्मध्ये उपरितनगुणस्थानाभिमुखे च भवति । एतत्सर्वं यथा देशसंयमे सविस्तरं प्रतिपादितं तथात्रापि ग्राह्यं । प्रतिपातादित्रितयं स्वस्वजघन्यस्थानात् स्वस्वोत्कृष्टस्थानपर्यंतमुपर्युपर्यसंख्यातलोकगुणितकषाययंतरेषु षट्स्वपि प्रत्येकमसंख्याततलोकमात्राणि षट्स्थानानि देशसंयमवज्ज्ञातव्यानि । तत्र प्रतिपातस्थानेषु मिथ्यात्वासंयमदेशसंयमाभिमुखभेदभिन्नेषु जघन्यानि तीव्रसंक्लिष्टस्य चरमसमये भवंति । उत्कृष्टानि तत्प्रायोग्यमन्दसंक्लिष्टस्य भवंति । तथा प्रतिपद्यमानजघन्यस्थानद्वयमार्यम्लेच्छस्वामिकं मिथ्यादृष्टिचरस्य भवति, तदुत्कृष्टस्थानयुगलमपि देशसंयतचरस्य भवति प्रतिपद्यमानस्थानानामुपर्यनुभयस्थानानि सामायिकच्छेदोपस्थापनसंयमद्वयसंबंधीनि भवंति । तत्संयमद्वयस्य जघन्योत्कृष्टस्थानयोर्द्वयोर्मध्ये परिहारविशुद्धिसंयमस्थानानि भवंति । परिहारविशुद्धिसंयमस्य जघन्यस्थानं संक्लेशवशात्सामायिकच्छेदोपस्थापनद्वये पतिष्यतस्तच्चरमसमये भवति । तस्य परिहारविशुद्धिसंयमस्योत्कृष्टस्थानं तस्मिन्नेव सर्वविशुद्धस्याप्रमत्तस्यैकांतवृद्धिचरमसमये भवति । सामायिकच्छेदोपस्थापनद्वयस्य मिथ्यात्वाभिमुखं जघन्यस्थानमोघजघन्यस्थानं सर्वसंयमसामान्यजघन्यस्थानं भवतीत्यर्थः । तयोरुत्कृष्टस्थानमनिवृत्तिकरणक्षपकचरमसमये भवति । सूक्ष्मसांपरायसंयमस्य जघन्यस्थानमुपशमश्रेण्यामवरोहतोऽनिवृत्तिकरणस्योपरि पतिष्यतः सूक्ष्मसांपरायोपशमकस्य चरमसमये भवति । तस्योत्कृष्टस्थानं क्षीणकषायगुणस्थानाभिमुखस्य सूक्ष्मसांपरायक्षपकस्य चरमसमये भवति । यथाख्यातचारित्रं सर्वसंयमसामान्योत्कृष्टं तस्य जघन्यादिविकल्पाभावात् । प्रतिपातप्रतिपद्यमानस्थानानि सर्वाण्यपि सामायिकच्छेदोपस्थापनसंयमद्वयप्रतिबद्धान्येव नेतरसंयमसंबन्धीनि पुनः सामायिकादिसर्वसंयमसम्बन्धीनि संभवंति । मिथ्यादृष्ट्यसंयतदेशसंयतानां सकलसंयमग्रहणकाले सामायिकच्छेदोपस्थापनसंयमयोरेव प्रथमतः प्रतिपत्तिनियमात् । संयमसामान्यापेक्षया प्रतिपद्यमानस्थानानि संयमग्रहणप्रथमसमयवर्तीनि सामायिकच्छेदोपस्थापनप्रतिबद्धान्येव । तथा सामायिकच्छेदोपस्थापनसंयमाभ्यां प्रच्यवमानस्यैव मिथ्यात्वासंयमदेशसंयमेषु प्रतिपातः संभवति, न परिहारविशुद्ध्यादिसंयमेभ्यः प्रच्यवमानस्य तत्प्रतिपातः परिहारविशुद्धिसूक्ष्मसांपरायसंयमाभ्यां प्रच्यवमानस्य सामायिकद्विके यथाख्यातचारित्रात्प्रच्यवमानस्य सूक्ष्मसांपरायसंयमेपि च प्रतिपातस्य सिद्धांते प्रतिपादितत्वात् ।

ननु भवक्षयादुपशमश्रेण्यां मृतस्य सूक्ष्मसांपराययथाख्यातचारित्रयोर्देवासंयते प्रतिपातोऽस्ति, अतः कथमसंयतप्रतिपाताभावः ? इति चेत् वयमिमे ब्रूमहे— संयमघातिकषायोदयवशोत्पन्नसंक्लेशवशेन गुणस्थानाद्वा क्षयेण वाधस्तनगुणस्थानेषु प्रतिपातस्यात्र विवक्षितत्वात् । भवक्षयहेतुकः प्रतिपातः पुनरत्राविवक्षितः । तत्प्रतिपातविवक्षायां पुनर्देशसंयमा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भिमुखतैव न मिथ्यात्वदेशसंयमाभिमुखता बद्धदेवायुष एव सकलसंयमिनः संयमकाले मृतस्य देवगतिं मुक्त्वान्यत्र गताव-नुत्पादात् । देवगतौ च मिथ्यादृष्टिष्वनुत्पादात् देशसंयमस्य तत्राभावाच्च । तदेवं सामायिकादिपंचप्रकारसकलसंयम-लब्धिस्वरूपं प्रासंगिकं मुख्यतस्तु प्रमत्ताप्रमत्तगुणस्थानवर्तिक्षायोपशमिकसकलसंयमलब्धिस्वरूपं च सविस्तरं प्ररूपितं ॥ १९९–२०४ ॥

स० चं०–संयमतैं पडतैं अर अंत समयविषैं असंयमकौं ग्रहतैं प्रथम समयविषैं क्रमतैं प्रतिपात अर प्रतिपद्यमान ए दोय स्थान हैं। बहुरि इनके बीचि वा ऊपरिके गुणस्थानकौं सन्मुख होतैं अनुभय स्थान हो है सो देश संयतवत् इहां भी जानना॥ १९८ ॥

स० चं०–प्रतिपात आदि तीन प्रकार स्थान अपने अपने जघन्यतैं उत्कृष्ट पर्यंत उपरि उपरि असंख्यातलोक गुणा क्रम लीएं हैं। तिन छहों विषैं प्रत्येक असंख्यात लोकमात्र वार षट्स्थानवृद्धि देशसंयतवत् जाननी ॥ १९९ ॥

स० चं०–तहां प्रतिपातस्थान मिथ्यात्व असंयत देशसंयतकौं सन्मुख होनेकी अपेक्षा तीन भेद लीए है। तहां जघन्य स्थान तौ तीव्र संक्लेशवालाकैं संयमका अंत समयविषैं हो है अर उत्कृष्ट स्थान यथायोग्य मदंसंक्लेशवालेकैं हो है ॥ २०० ॥

स० चं०–प्रतिपद्यमानस्थान आर्य म्लेच्छकी अपेक्षा दोय प्रकार, सो तिनका जघन्य तौ मिथ्यादृष्टितैं संयमी भया ताकैं हो है। उत्कृष्ट देशसंयततैं संयमी भया ताकैं हो है।।तिनके ऊपरि अनुभय स्थान हैं ते सामायिक छेदोपस्थापना संबंधी हैं। तिनिका जघन्य उत्कृष्टके बीचि परिहारविशुद्धिके स्थान हैं ॥ २०१ ॥

स० चं०–परिहारविशुद्धिका जघन्य स्थान तौ सामायिक छेदोपस्थापनविषैं पडता जीवकैं ताका अंत समयविषैं हो है। अर ताका उत्कृष्ट स्थान सर्वतैं विशुद्ध अप्रमत्त गुण २४९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थानवर्ती तिस ही जीवकै एकांत वृद्धिका अंत समयविषैं हो है ॥ २०२ ॥

स० चं०—सामायिक छेदोपस्थापनाका जघन्य स्थान मिथ्यात्वकौं सन्मुख जीवकैं संयमका अंतसमयविषैं हो है बहुरि जो जघन्य संयमका स्थान सो ही है। ताका उत्कृष्ट स्थान अनिवृत्तिकरण क्षपकश्रेणिवाला ताका अंत समयविषैं हो है । बहुरि उपशमश्रेणिविषैं पडतैं सूक्ष्मसांपरायका अंत समयविषैं अनिवृत्तिकरणकौं सन्मुख होतैं सूक्ष्मसांपरायका अंतसमयविषै जघन्य स्थान हो है ॥ २०३ ॥

स० चं०—क्षपक सूक्ष्मसांपरायका क्षीणकषायके सन्मुख भया ताका अंत समयविषैं सूक्ष्मसांपरायका उत्कृष्ट स्थान हो है। बहुरि यथाख्यात चारित्र सर्व सामान्य चारित्रका उत्कृष्ट स्थान अभेद रूप है। बहुरि प्रतिपात प्रतिपद्यमानके जे स्थान कहे ते सर्व ही सामायिक छेदोपस्थापन संबंधी ही जानने। जातैं सकल संयमतैं भ्रष्ट होतैं अंत समयविषैं अर सकल संयमकौं ग्रहतैं प्रथम समयविषै सामायिक छेदोपस्थापन संयम ही हो है। अन्य परिहार विशुद्धि आदि न हो है। इहां कोऊ कहै—

उपशमश्रेणिविषैं मरणकी अपेक्षा सूक्ष्मसांपराय यथाख्याततैं पडि देव पर्याय संबंधी असंयतविषैं पडना हो है तहां प्रतिपातका अभाव कैसैं कहिए ? ताका समाधान—इहां संयमका घात कषायनिके उदयतैं वा गुणस्थानके कालका क्षय होनेतैं जो पडना होइ ताहीकी विवक्षा है। पर्याय नाशतैं पडना होइ ताकी विवक्षा नाहीं। जो यहु विवक्षा होइ तौ ताका प्रतिपातविषैं देवसंबंधी असंयतहीके सन्मुखपना संभवै है जातैं सकल संयमहीविषैं जो मूवा ताकैं अन्य गति वा मिथ्यात्व देश संयतपना संभवै नाहीं है। ऐसैं प्रसंग पाइ सामायिक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आदि पंचप्रकार सकलचारित्रके स्थान कहे। मुख्यपने प्रमत्त अप्रमत्त गुणस्थानविषै संभवता जो क्षायोपशमिक सकल चारित्र ताका प्ररूपण कीया ॥ २०४ ॥

इति क्षायोपशमिकसकलचारित्रप्ररूपणं समाप्तं ॥

अथ चारित्रमोहोपशमनं परममंगलपूर्वकं प्रतिजानीते—

उवसमियसकलः उपशमितसकलदोषानुपशांतकषायवीतरागांतानुपशमकान् प्रणम्य कषायोपशमनं वक्ष्यामीति ।

अथ चारित्रमोहोपशमनाभिमुखस्य स्वरूपमाह—

अथ उपशांत कीएं हैं सकल दोष जिनि ऐसे उपशांत कषाय वीतराग तिनहि प्रणाम करि उपशम चारित्रका विधान कहिए है—

उवसमचरियाहिमुहो वेदगसम्मो अणं विजोयित्ता ।
अंतोमुहुत्तकालं अधापवत्तोऽपमत्तो य ॥ २०५ ॥

उपशमचरित्रामुखो वेदकसम्यक् अनं वियोज्यं ।
अंतर्मुहूर्तकालं अधाप्रवृत्तोऽप्रमत्तश्च ॥ २०५ ॥

सं० टी०—उपशमचारित्राभिमुखो वेदकसम्यग्दृष्टिर्जीवः प्रथममनंतानुबंधिचतुष्टयं प्रागुक्तविधिना विसंयोज्यांतर्मुहूर्तकाल-पर्यंतमथाप्रवृत्ताप्रमत्ताभिधानः स्वस्थानाप्रमत्तः प्रमत्ताप्रमत्तपरावृत्तिसहस्राणि कुर्वन् विश्राम्यति । ततः परं दर्शनमोहत्रयं क्षपयित्वा क्षायिकसम्यग्दृष्टिः सन् कश्चिज्जीवश्चारित्रमोहमुपशमयितुं प्रारभते । तस्य दर्शनमोहक्षपणा विधिना प्रागुक्ते-नेति नेह पुनरुच्यते । यः पुनर्द्वितीयोपशमसम्यक्त्वेनोपशमश्रेणिमारोहति तस्य दर्शनमोहोपशमविधानप्रतिपादनार्थमिद-माह ॥ २०५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—उपशम चारित्रके सन्मुख भया वेदक सम्यग्दृष्टि जीव सो पहिलैं पूर्वोक्त विधानतैं अनंतानुबंधीका विसंयोजन करि अंतर्मुहूर्तकाल पर्यंत अधःप्रवृत्त अप्रमत्त कहिए स्वस्थान अप्रमत्त हो है। तहां प्रमत्त अप्रमत्तविषै हजारोंवार गमनागमन करि पीछैं अप्रमत्तविषै विश्राम करै है। तहां पीछैं कोई जीव तीन दर्शन मोहकौं खिपाइ क्षायिक सम्यग्दृष्टी होइ चारित्र मोहके उपशमनका प्रारंभ करै ताकैं तौ क्षायिक सम्यक्त्व होनेका विधान पूर्वैं कह्या है सो जानना। बहुरि कोई जीव द्वितीयोपशम सम्यक्त्व सहित उपशम श्रेणि चढै ताके दर्शन मोहके उपशमनका विधान कहिए है ॥२०५॥

तत्तो तियरणविहिणा दंसणमोहं समं खु उवसमदि।
सम्मत्तुप्पत्तिं वा अण्णं च गुणसेढिकरण विही ॥

ततः त्रिकरणविधिना दर्शनमोहं समं खलु उपशमयाति।
सम्यक्त्वोत्पत्तिमिव अन्यं च गुणश्रेणिकरणं विधिः ॥ २०६ ॥

बादरप्रथमे कृष्टिः मोहस्य च आनुपूर्विसंक्रमणं ।
नष्टं न च उच्छिष्टं स्पर्धकलोभं तु वेदयाति ॥ ३१५ ॥

सं० टी०— अनिवृत्तिकरणस्य प्रथमसमये सूक्ष्मकृष्टयः उच्छिष्टावलिमात्रनिषेकान् वर्जयित्वा सर्वाः स्वरूपेण विनष्टाः सूक्ष्मकृष्टिशक्तितोऽनंतगुणशक्तियुक्तस्पर्धकस्वरूपेणैकस्मिन् समये परिणमिता इत्यर्थः । उच्छिष्टावलिमात्रनिषेककृष्टयस्तु प्रतिसमयमेकैकनिषेकप्रमाणेन उदयमानस्पर्धकनिषेकेषु स्थितोक्तसंक्रमेण तद्रूपतया परिणम्योदेष्यंति । तस्मिन्नेव प्रथमसमये मोहस्यानुपूर्विसंक्रमश्च नष्टः । अयं तु विशेषः—

अप्रत्याख्यानप्रत्याख्यानलोभद्वयस्य संज्वलनलोभे बध्यमाने यद्यपि संक्रमः प्रारब्धस्तथापि तदविवक्षया संज्वलनलोभस्य बध्यमानसजातीयकषायांतरासंभवात् आनुपूर्वीसंक्रमो व्यक्त्यपेक्षया विनष्टः । शक्त्यपेक्षया संज्वलनलोभद्रव्यस्याप्यनानुपूर्व्या परप्रकृतिसंक्रमपरिणामः संजातः । सूक्ष्मसांपराये तु मोहस्य बंधाभावात् संक्रमो न संभवत्येवेति । तथैव स्पर्धकगतं बादरसंज्वलनलोभमुदयमानमनुभवन् जीवो बादरसांपरायानिवृत्तिकरणप्रथमसमये संज्वलनलोभद्रव्यमपकृष्य उदयसमयादारभ्य बादरलोभवेदककालसाधिकद्वित्रिभागमात्रे आवल्यभ्यधिके २ ७ २ ॥ ३ अवस्थितायामे प्रतिनिषेकमसंख्यातगुणितक्रमेण निक्षिपति । प्रत्याख्यानाप्रत्याख्यानलोभद्वयद्रव्यमपकृष्य उदयावलिबाह्ये पूर्वोक्तायामे असंख्यातगुणितक्रमेण निक्षिपति । द्वितीयादिसमयेषु पुनरसंख्येयगुणहीनं द्रव्यमपकृष्यावस्थितायामे गुणश्रेणिं करोति ॥ ३१५ ॥

स० चं०— अवरोहक अनिवृत्तिकरणका प्रथम समयविषैं सूक्ष्मकृष्टि हैं ते उच्छिष्टावलीमात्र निषेक विना अन्य सर्वही स्वरूप करि नष्टभई सूक्ष्मकृष्टिकी अनुभागशक्तितैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनंतगुणी शक्तियुक्त जो स्पर्धक तिन स्वरूप होइ एकही समयविषैं परिणईं। बहुरि कृष्टिके उच्छिष्टावलीमात्र निषेक रहे ते समय समय प्रति एक एक निषेककरि उदयमान जे स्पर्धकके निषेक तिनविषै थिउक संक्रमकरि तद्रूप परिणमि उदय होसी। बहुरि तिसही प्रथम समयविषैं मोहका आनुपूर्वी संक्रम भी नष्ट भया। इतना विशेष—जो अप्रत्याख्यान प्रत्याख्यान लोभका बध्यमान जो संज्वलन लोभ तिसहीविषैं संक्रम होनेका प्रारंभ भया तथापि याविषैं आनुपूर्वी संक्रमकी विवक्षा नाहीं। बहुरि संज्वलन लोभकैं बध्यमान और कोई स्वजातीय प्रकृति नाहीं तातैं व्यक्ति अपेक्षा आनुपूर्वी संक्रम नष्ट भया। शक्ति अपेक्षा संज्वलन लोभके आनुपूर्वीकरि अन्य प्रकृतिविषैं संक्रम होनेका परिणाम भया है। बहुरि सूक्ष्मसांपरायविषैं मोहके बंधका अभावतैं संक्रम संभवै नाहीं। बहुरि तथैव स्पर्धकरूप जो वादर लोभ उदय आया ताकौं भोगवता जो अनिवृत्तिकरण वादर सांपराय ताका प्रथम समयविषैं संज्वलन लोभका द्रव्यकौं अपकर्षण करि उदय रूप समयतै लगाय वादर लोभवेदक कालका साधिक दोय तीसरे भाग आवलीकरि अधिक प्रमाणमात्र जो गुणश्रेणि आयाम तिसविषैं असंख्यातगुणा क्रमलीएं निक्षेपणकरै है। अर प्रत्याख्यान अप्रत्याख्यान लोभका द्रव्यकौं उदयावलीतैं वाह्य पूर्वोक्त गुणश्रेणी आयामविषैं असंख्यात गुणा क्रमलीएं निक्षेपण करै है। बहुरि अनिवृत्तिका द्वितीयादि समयनिविषैं असंख्यातगुणा घटता क्रमलीएं द्रव्यकौं अपकर्षणकरि अवस्थित गुणश्रेण्यायामविषै पूर्वोक्तप्रकार निक्षेपण करै है। अन्य कर्मनिकी गलितावशेष गुणश्रेणी पूर्वैं कही है सोई जाननीं ॥ ३१५ ॥

ओदरवादरपढमे लोहस्संतोमुहुत्तियो बंधो।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुदिणंतो घादितियं चउवस्संतो अघादितियं ॥

अवतरवादरप्रथमे लोभस्यांतर्मुहूर्तको बंधः ।
द्विदिनांतो घातित्रिके चतुर्वर्षान्तोऽघातित्रये ॥ ३१६ ॥

सं० टी०—अवतारकवादरसांपरायानिवृत्तिकरणप्रथमसमये संज्वलनलोभस्य स्थितिबंधोंऽतर्मुहूर्तमात्रः, स चारोहकृतचरमसमयस्थितिबंधाद् द्विगुणः । ज्ञानदर्शनावरणांतरायाणां किंचिन्न्यूनदिनद्वयमात्रः । नामगोत्रयोः किंचिन्न्यूनचतुर्वर्षमात्रः । वेदनीयस्य तीसियप्रतिभागत्वाद् द्व्यर्धगुणितकिंचिन्न्यूनचतुर्वर्षमात्रः । ततोंऽतर्मुहूर्तमात्रे समबंधककाले गते पुनः संज्वलनलोभस्थितिबन्धो विशेषाधिकः २ ७ । २ घातित्रयस्य दिनपृथक्त्वं दि ७/८ अघातित्रयस्य संख्यातसहस्रवर्षमात्रः १००० ७ एवं संख्यातसहस्रेषु स्थितिबंधेषु आकृष्योत्कृष्यं संवृत्तेषु यदा लोभवेदककाल २ ७ ३/३ (?) द्वितीयत्रिभागस्य २ ७ १/३ संख्येयभागो गतः २ ७ १/७ ३ तदा संज्वलनलोभस्य स्थितिबंधो मुहूर्तमात्रपृथक्त्वं । मु ७/८ । घातित्रयस्य वर्षसहस्रपृथक्त्वं व १०००७/८ अघातित्रयस्य संख्येयसहस्रवर्षमात्रः व १००० ७ ७ एवं स्थितिबन्धसहस्रेषु गतेषु लोभवेदककालः समाप्तो भवति । अयं विशेषः—

आरोहकस्य लोभवेदककालादवरोहकस्य लोभवेदककालः किंचिन्न्यून इति ज्ञातव्यं । एवं सर्वत्र मायावेदकादिकालेषु अपि आरोहककालादवरोहकस्य किंचिन्न्यूनता द्रष्टव्या ॥ ३१६ ॥ अथावरोहकानिवृत्तिकरणवादरसांपरायस्य मायावेदककाले क्रियाविशेषप्रदर्शनार्थं गाथाद्वयमाह—

स० चं०—— उतरनेवाला वादरसांपराय अनिवृत्ति करणका प्रथम समयविषै संज्वलन लोभका स्थितिबंध अंतर्मुहूर्तमात्र है सो चढनेवाला अनिवृत्ति करणका अंत समय संबंधी स्थितिबंधतैं दूणा जानना । बहुरि तीन घातियानिका किछू घाटि दोय दिन, नाम गोत्रका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किछू घाटि च्यारि दिन, वेदनीयका यातैं ड्योढ गुणा स्थितिबंध है। बहुरि अंतर्मुहूर्त पर्यंत ऐसा समान बंध भया पीछैं संज्वलन लोभका पूर्वतैं किछू अधिक तीन घातियानिका पृथक्त्व दिनमात्र तीन अघातियानिका संख्यात हजार वर्षमात्र स्थितिबंध भया । बहुरि ऐसैं वृद्धिरूप संख्यात हजार स्थितिबंध भएं लोभ वेदक कालका दूसरा त्रिभागका संख्यातवां भाग व्यतीत भया तब संज्वलन लोभका पृथक्त्व मुहूर्त, तीन घातियानिका पृथक्त्व हजार वर्ष, तीन अघातियानिका संख्यात हजारवर्ष प्रमाण स्थितिबंध हो है । बहुरि हजारों स्थितिबंध गएं लोभ वेदकका काल समाप्त हो है। आरोहकके लोभ वेदकका कालतैं अवरोहकका लोभ वेदक काल किंचित् न्यून है। ऐसैं ही मायावेदक कालादिकनिविषै किंचित् न्यूनता जाननी। जिस कषायका जेता कालविषै उदयका भोगना होइ तिस प्रमाण ताका वेदक काल जानना ॥ ३१६ ॥

ओदरमायापढमे मायातिण्हं च लोभतिण्हं च ।
ओदरमायावेदगकालादहियो दु गुणसेढी ॥ ३१७॥

अवतरमायाप्रथमे मायात्रयाणां च लोभत्रयाणां च ।
अवतरमायावेदककालादधिका तु गुणश्रेणी ॥ ३१७॥

सं० टी०—लोभवेदककालसमाप्त्यनंतरं मायावेदककालप्रथमसमये अवतारकानिवृत्तिकरणः, अप्रत्याख्यानप्रत्याख्यानसंज्वलनमायात्रयद्रव्यं तत्तद्द्वितीयस्थितेरपकृष्य उदयवतो मायासंज्वलनस्य उदयसमयादारभ्यावतारकमाया- १- वेदककालादावल्यधिके २ ७ अवस्थितायामे गुणश्रेणिं करोति । उदयरहितस्य मायाद्वयस्य उदयावलिबाह्ये तावन्मात्रा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यामे २ ७ृ अवस्थितगुणश्रेणिं करोति। तथा उदयरहितस्य लोभत्रयस्यापि द्वितीयस्थितिद्रव्यमपकृष्य उदयावलिबाह्ये संज्वलनमायावेदककाल २ ७ृ मात्रे अवस्थितायामे गुणश्रेणिं करोति। ज्ञानावरणादिशेषकर्मणां प्रागुक्तायामे गलितावशेषगुणश्रेणिं करोति। तस्मिन्नेव मायावेदकप्रथमसमये लोभत्रयद्रव्यं मायाद्वयद्रव्यं च मायासंज्वलने संक्रामति तथा द्विविधमायाद्रव्यं त्रिविधलोभद्रव्यं च लोभसंज्वलने संक्रामति। तस्यापि बंधसंभवात्। बंधरहितेषु न संक्रामति अनानुपूर्वीसंक्रमप्रतिज्ञानादेवंविधसंस्थुलसंक्रमणसंभवः॥ ३१७॥

स० चं०— लोभ वेदक कालके अनंतरि माया वेदक कालका प्रथम समयविषै उतरनेवाला अनिवृत्ति करण है सो अप्रत्याख्यान प्रत्याख्यान संज्वलन मायाके द्रव्यकों अपनी अपनी द्वितीय स्थितिविषैतैं अपकर्षणकरि उदय रूप जो संज्वलन नाम माया ताके द्रव्यकौं तौ उदयावलीका प्रथम समयतैं लगाय अर उदय रहित दोय मायाके द्रव्यकौं उदयावलीतैं बाह्य प्रथम समयतैं लगाय आवलीकरि अधिक मायावेदक काल प्रमाण अवस्थिति आयामविषै गुणश्रेणि करै है। बहुरि उदय रहित तीन लोभ तिनका भी द्वितीय स्थितिके द्रव्यकौं अपकर्षण करि उदयावलीतैं बाह्य साधिक मायावेदक कालमात्र अवस्थिति आयामविषै गुणश्रेणि करै है। अर अवशेष छह कर्मनिकी पूर्वोक्त गलितावशेष आयामविषै गुणश्रेणि करै है। बहुरि तिस ही माया वेदक कालका प्रथम समयविषै तीन लोभका द्रव्य दोय मायाका द्रव्य है सो संज्वलन मायाविषै संक्रमण करै है। अथवा दोय मायाका द्रव्य तीन लोभका द्रव्य है सो संज्वलन लोभविषै संक्रमण करै है जातैं इहां संज्वलन लोभ वा मायाहीका बंध है। अर बंधविषै ही संक्रमण हो है। आनुपूर्वी संक्रमणके अभावतैं ऐसैं बंध संभवै है॥ ३१७॥

ओदरमायापढमे मायालोभे दुमासठिदिबंधो।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छण्हं पुण वस्साणं संखेज्जसहस्सवस्साणि ॥३१८॥

अवतरमायाप्रथमे मायालोभे द्विमासस्थितिबंधः ।
षण्णां पुनः वर्षाणां संख्येयसहस्रवर्षाणि ॥३१८॥

सं० टी०— अवतारकमायावेदकप्रथमसमये संज्वलनमायालोभयोः स्थितिबन्धो द्विमासमात्रः । घातित्रयस्य संख्यातसहस्रवर्षमात्रः, अघातित्रयस्य ततः संख्येयगुणः । एवं स्थितिबंधसहस्रेषु गतेषु मायावेदककालः समाप्तो भवति ॥ ३१८ ॥ अथ मानवेदकस्य क्रियाविशेषं प्ररूपयन् गाथाद्वयमाह—

स० चं०— उतरनेवाला मायावेदक कालका प्रथम समयविषै संज्वलन माया लोभका दोय मास, तीन घातियानिका संख्यात हजार वर्ष तीन अघातियानिका तातैं संख्यातगुणा स्थितिबंध हो है। ऐसैं संख्यात हजार स्थितिबंध भएं माया वेदक काल समाप्त भया ॥ ३१८ ॥

ओदरगमाणपढमे तेत्तियमाणादियाण पयडीणं ।
ओदरगमाणवेदगकालादहियं दु गुणसेढी ॥३१९॥

अवतरकमानप्रथमे तावन्मानादिकानां प्रकृतीनाम् ।
अवतरकमानवेदककालादधिकातु गुणश्रेणी ॥ ३१९ ॥

सं० टी०— अयमवतारकानिवृत्तिकरणो मायावेदककालपरिसमाप्त्यनंतरसमये संज्वलनमानद्रव्यमपकृष्य उदयसमयादारभ्य मानवेदककालावलिकाभ्यधिके अवस्थितायामे गुणश्रेणिं करोति । मध्यममानद्वयस्य मायात्रयस्य लोभत्रयस्य च द्रव्यमपकृष्य उदयावलिबाह्यं तावन्मात्रायामे अवस्थितगुणश्रेणिं करोति । तस्मिन्नेव मानवेदकप्रथमसमये नवविधकषायद्रव्यमनानुपूर्व्या बध्यमानलोभमायामानेषु संक्रामति ॥ ३१९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०— ताके अनंतरि मान वेदक कालका प्रथम समयविषै संज्वलन मानका द्रव्यकौं अपकर्षणकरि उदयावलीका प्रथम समयतैं लगाय अर दोय मान तीन माया तीन लोभानिके द्रव्यकौं अपकर्षणकरि उदयावलीतैं बाह्य प्रथम समयतैं लगाय आवली अधिक मान (या) वेदक कालका प्रमाण अवस्थित आयामविषै गुणश्रेणि करै है। औरनिकी गलितावशेष गुणश्रेणि आयाम है ही। बहुरि तिस ही समयविषै अप्रत्याख्यान प्रत्याख्यान संज्वलन लोभ माया मानरूप नव कषायनिका द्रव्य है सो इहां बध्यमान संज्वलन मान माया लोभनिविषै आनुपूर्वी रहित जहां तहां संक्रमण करै है ॥ ३१९ ॥

ओदरगमाणपढमे चउमासा माणपहुदिठिदिबंधो।

छण्हं पुण वस्साणं संखेज्जसहस्समेत्ताणि ॥ ३२० ॥

अवतरकमानप्रथमे चतुर्मासा मानप्रभृतिस्थितिबंधः।

षण्णां पुनः वर्षाणां संख्येयसहस्रमात्राणि ३२० ॥

सं० टी०— तस्मिन्नेव मानवेदकप्रथमसमये संज्वलनमानमायालोभानां स्थितिबंधश्चतुर्मासमात्रः। घातित्रयस्य संख्यातसहस्रवर्षमात्रः। अघातित्रयस्य ततः संख्येयगुणः। एवं स्थितिबन्धसहस्रेषु गतेषु मानवेदककालः समाप्तो भवति ॥ ३२० ॥ अथानिवृत्तिकरणबादरसांपरायस्य संज्वलनक्रोधे प्रतिपातप्ररूपणार्थं गाथाद्वयमाह—

स० चं०— तिसही उतरनेवाले मान वेदक कालका प्रथम समयविषै संज्वलन मान माया लोभनिका चारि मास तीन घातियानिका संख्यात हजार वर्ष तीन अघातियानिका तातैं संख्यातगुणा स्थितिबंध हो है। ऐसैं संख्यात हजार स्थितिबंध भएं मान वेदकका काल समाप्त भया ॥ ३२० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ओदरगकोहपढमे छक्कम्मसमाणया हु गुणसेढी।
बादरकसायणं पुण एतो गलिदावसेसं तु ॥३२१॥

अवतरकक्रोधप्रथमे षट्कर्मसमानिका हि गुणश्रेणी।
बादरकषायाणां पुनः इतः गलितावशेषं तु ॥ ३२१ ॥

सं० टी०— संज्वलनमानवेदककालसमाप्त्यनंतरं सोऽयमवतारकोऽनिवृत्तिकरणः संज्वलनक्रोधोदयप्रथमसमये ज्ञानावरणादिषट्कर्मणां प्रागुपक्रांतेनावतारकानिवृत्त्यपूर्वकरणकालद्वयाद्विशेषाधिकगलितावशेषगुणश्रेण्यायामेन समाने आयामे द्वादशकषायाणां गुणश्रेणिं गलितावशेषां करोति। इतः पूर्वं मोहनीयस्यावस्थितायामा गुणश्रेणी कृता। इदानीं पुनर्गलितावशेषायामा प्रारब्धेत्ययं विशेषः। यस्य कषायस्योदयेनोपशमश्रेणीमारूढो जीवः पुनरवतरणे तस्य कषायस्य उदयसमयादारभ्य गलितावशेषगुणश्रेणिरन्तरापूरं च क्रियते। तत्रोदयवतः संज्वलनक्रोधस्य द्रव्यमपकृष्य स a १२- / ७। ८। ओ पल्यासंख्यातभागेन खण्डयित्वा तदेकभागं स a १२- / ७। ८। ओ प उदयादिगुणश्रेण्यायामे निक्षिपति। पुनर्द्वितीयस्थितौ प्रथमनिषेकद्रव्यं स a १२- / ७। ८। १२ (a) इदं, पदहतमुखमादिधनमित्यनेनांतर्मुहूर्तमात्रांतरायामेन गुणयित्वा लब्धं समपट्टिकाधनं— स a १२- । २ ९ / ७। ८। १२ द्वितीयस्थितिप्रथमनिषेके द्विगुणगुणहान्या विभज्य द्वाभ्यां गुणिते अधस्तनगुणहानिचयो भवति।

सैकपदाहतपददलचयहतमुत्तरधनमित्यानीतं चयधनं स a १२- । २ । २ ९ (१-) । २ ९ / ७। ८। १२। १६। २ इदं प्रागानीते समपट्टिकाधने सा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धिकं कुर्यात् स ३ । १२–।२ ७ एतावद्द्रव्यमपकृष्टद्रव्यस्य पल्यासंख्यातभागखंडितबहुभागद्रव्यात् गृहीत्वा अद्धा-
७।८।१२
णेण सव्वधरो खंडिदेत्यादिविधिना विशेषहीनक्रमेणांतरायामे निक्षिपेत् । अवशिष्टबहुभागद्रव्यं स ३ १२– प द्विती-
७।८।ओ प
यस्थितौ ' दिवड्ढगुणहाणिभाजिदे पढमा ' इत्यादिविधिना नानागुणहानिषु विशेषहीनक्रमेण तत्तदपकृष्टनिषेकमति-स्थापनावलिमात्रेणाप्राप्य निक्षिपति । एवं निक्षिप्ते गुणश्रेणिशीर्षद्रव्यादंतरायामप्रथमसमयनिक्षिप्तद्रव्यमसंख्यातगुण-हीनं । अंतरायामचरमसमयनिक्षिप्तद्रव्याद् द्वितीयस्थितिप्रथमसमयनिक्षिप्तद्रव्यमसंख्यातगुणहीनं द्रष्टव्यं । एवमुदयरहि-तानां शेषैकादशकषायाणां द्रव्यमपकृष्य उदयावलिबाह्यगुणश्रेण्यायामे अंतरायामे द्वितीयस्थितौ च द्रव्यत्रयनिक्षेप-विधिः कर्तव्यः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



स ३ १२ १६ – ८
७।८। ओ १६ प १६
० ३ २
०

स ३ १२ – १६
७।८। ओ । १२ । १६
०

स ३ १२ – २ १७ । १६
७।८।२ १७ । १६ – २ १७ १६
० २

स ३ १२ – २ १७ १६ – २ १७
७।८।२ १७ । १६ – २ १७ १६
० २

स ३ १२ – ६४
७।८। ओ प ८५
० ३
०

स ३ । १२ – १
७।८। ओ प ८५
। ३

संज्वलनमानादित्रयद्रव्ये स ३ १२– ३ । सर्वघातिमध्यमकषायाष्टकद्रव्येण तदनंतैकभागमात्रेण—
७।८ ।
स ३ १२– । ८ साधिकशेषकादशकषायद्रव्यमित्थं भवति स ३ १२– । ३ अस्मादपकृष्य गुणश्रेण्यादिषु निक्षिपती-
७। ख १७ ७।८
त्यर्थः । संज्वलनक्रोधोदयप्रथमसमये द्वादशकषायाणां द्रव्यं बध्यमानेषु संज्वलनक्रोधादिषु चतुर्षु अनानुपूर्व्या संक्रमति ॥ ४१०

स० चं०– ताके अनंतरि उतरनेवाला अनिवृत्ति करण है सो संज्वलन क्रोधके उद-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यका प्रथम समयविषै अप्रत्याख्यान प्रत्याख्यान संज्वलन क्रोध मान माया लोभ रूप बारह कषायनिकी ज्ञानावरणादि छह कर्मनिके समान गलितावशेष गुणश्रेणि करै है। याके आयामका प्रमाण उतरनेवालेका अनिवृत्ति करण अपूर्व करणके कालतैं किछू अधिक है। इहांतैं पहले मोहका गुणश्रेणि आयाम अवस्थित था अब गलितावशेषरूप प्रारंभ भया। बहुरि इतना जानना—

जिस कषायके उदयकरि उपशमश्रेणी चढ्या होइ बहुरि उतरनेविषै तिसकषायका जिससमय उदय होइ तिस समयतैं लगाय सर्व मोहकी गलितावशेष गुणश्रेणी करिए है। अर अंतरका पूरना करिए है सो इहां क्रोधकी विवक्षा है तातैं तिसकी अपेक्षा ही कथन करिए है—

तहां उदयवान् जो संज्वलन क्रोध ताके द्रव्यकौं अपकर्षण भागहारका भाग देइ तहां एक भागकौं ग्रहि ताकौं पल्यका असंख्यातवां भागका भाग देइ तहां एक भाग तौ उदय समयतैं लगाय गुणश्रेणि आयामविषै निक्षेपण करै है। बहुरि बहुभागमात्र द्रव्यविषै कितना इक द्रव्यकौं अंतरायामविषै "अद्धाणेण सव्वधणे खंडिदे" इत्यादि विधानतैं चय घटता क्रम लीएं निक्षेपण करि अवशेष द्रव्यकौं तिस क्रोधकी द्वितीय स्थितिविषै 'दिवड्ढगुणहाणिभाजिदे पढमा' इत्यादि विधानतैं नानागुणहानिविषै अंतविषै अतिस्थापनावली छोडि निक्षेपण करै है। इहां अंतरायामविषैं कितना द्रव्य दीया ताके जाननेकौं उपाय कहैं हैं—

द्वितीय स्थितिके प्रथम निषेकका जो द्रव्यका प्रमाण ताकौं 'पदहतमुखमादिधनं'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इस सूत्रकरि अंतरायाममात्र गच्छकरि गुणैं अंतरायामविषै समपट्टिकारूप आदिधन हो है। बहुरि द्वितीय स्थितिके प्रथम निषेककौं दो गुणहानिका भाग दीएं द्वितीय स्थितिकी प्रथम गुणहानिविषै चयका प्रमाण आवै है। ताकौं दोयकरि गुणैं ताके नीचैं जो अंतरायाम तीहिंविषै चयका प्रमाण आवै है। बहुरि "सैकपदाहतपददलद्वयहतमुत्तरधनं" इस सूत्रकरि एक अधिक गच्छकरि गच्छका आधा प्रमाणकौं गुणि बहुरि ताकौं चयका प्रमाण करि गुणैं उत्तर धनका प्रमाण आवै है। इहां प्रथम स्थानविषै भी चय मिल्या है तातैं ऐसा सूत्र कह्या है सो आदि धन उत्तर धन मिलाएं जो प्रमाण भया तितना द्रव्य इहां अंतरायामविषै दीजिए है। इहां द्वितीय स्थितिका प्रथम निषेकके नीचैं अंतरायाम है तातैं ताकी अपेक्षातैं कथन कीया है सो इतना द्रव्य दीएं जिनि निषेकनिका अभाव कीया था तिनिका सद्भाव जैसा प्रथम स्थितिके नीचैं चय घटता क्रम लीएं संभवै तैसा हो है। ऐसैं निक्षेपण कीएं गुणश्रेणि शीर्षकेविषै निक्षेपण कीया द्रव्यतैं अंतरायामका प्रथम निषेकविषै निक्षेपण कीया द्रव्य असंख्यातगुणा घटता है। बहुरि अंतरायामका अंतानिषेकविषै निक्षेपण कीया द्रव्यतैं द्वितीय स्थितिका प्रथम समयविषै निक्षेपण कीया द्रव्य असंख्यातगुणा घटता है ऐसा जानना। बहुरि संज्वलन मानादिक तीन कषायका द्रव्यविषै ताके अनंतवे भागमात्र सर्व घाती अप्रत्याख्यान प्रत्याख्यान आठ कषायनिका द्रव्यकौं अधिक कीएं उदय रहित ग्यारह कषायनिका द्रव्य हो है। तिस द्रव्यतैं अपकर्षण करि उदयावलीतैं बाह्य गुणश्रेणि आयामविषै अंतरायामविषै द्वितीय स्थितिविषैं निक्षेपण पूर्वोक्त प्रकार दीजिए है। बहुरि क्रोध उदयका प्रथम समयविषै बारह कषायनिका द्रव्यकौं तत्काल बध्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मान जे संज्वलन क्रोधादिक च्यारि तिनिविषै आनुपूर्वी विना जहां तहां संक्रमण करे है ॥

ओदरगकोहपढमे संजलणाणं तु अट्ठमासठिदी।
छण्हं पुण वस्साणं संखेज्जसहस्सवस्साणि ॥३२२॥

अवतरकक्रोधप्रथमे संज्वलनानां तु अष्टमासस्थितिः।
षण्णां पुनः वर्षाणां संख्येयसहस्रवर्षाणि ॥ ३२२ ॥

सं० टी०— अवतारकानिवृत्तिकरणसंज्वलनक्रोधोदयप्रथमसमये संज्वलनचतुष्टयस्य स्थितिबंधोऽष्टमासमात्रः। घातित्रयस्य संख्यातसहस्रवर्षमात्रः। ततः संख्येयगुणो नामगोत्रयोः। ततो द्व्यर्धगुणितो वेदनीयस्य॥ ३२२ ॥ अथावतारकानिवृत्तिकरणस्य पुंवेदोदयकाले संभवत्क्रियाविशेषान् गाथाचतुष्टयेनाह—

स० चं०— उतरनेवालेकैं क्रोध उदयका प्रथम समयविषै संज्वलन च्यारि कषायनिका आठ मास, तीन घातियानिका संख्यात हजार वर्ष, नाम गोत्रका तातैं संख्यातगुणा वेदनीयका तातैं ड्योढा स्थितिबंध हो है ॥ ३२२ ॥

ओदरगपुरिसपढमे सत्तकसाया पणट्ठउवसमणा।
उणवीसकसायाणं छक्कम्माणं समाणगुणसेढी ॥

अवतरकपुरुषप्रथमे सप्तकषायाः प्रणष्टोपशमकाः।
एकोनविंशकषायाणां षट्कर्मणां समानगुणश्रेणी ॥ ३२३ ॥

सं० टी०— संज्वलनक्रोधवेदककाले पुंवेदोदयप्रथमसमये युगपदेव पुंवेदो हास्यादिषण्णोकषायाश्च प्रणष्टोपशमकरणाः संजाताः। तदैव द्वादशकषायाणां सप्तनोकषायाणां च ज्ञानावरणादिषट्कर्मगुणश्रेण्यायामसमानेन आ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यामेन गुणश्रेणिं करोति । तत्रोदयवतोः पुंवेदसंज्वलनक्रोधयोः द्रव्यमपकृष्य उदयादिगुणश्रेण्यायामे अंतरायामे द्वितीयस्थितौ च संज्वलनक्रोधोक्तप्रकारेण द्रव्यनिक्षेपं करोति। उदयरहितानां शेषकषायनोकषायाणां द्रव्यमपकृष्य उदयावलिबाह्यगुणश्रेण्यायामे अंतरायामे द्वितीयस्थितौ च पूर्वोक्तप्रकारेण निक्षिपति। तदैव सप्तनोकषायाणामनानुपूर्व्या संक्रमोऽपि पूर्ववज्ज्ञातव्यः । तदैव पुंवेदस्य बन्धोऽपि प्रारब्धः ॥ ३२३ ॥

स० चं०— संज्वलन क्रोध वेदक कालविषै पुरुष वेदका उदय होनेका प्रथम समयविषै पुरुषवेद अर छह हास्यादिक ए सात कषाय हैं ते नष्ट भया है उपशम करण जिनकौं ते ऐसे भए। तब ही बारह कषाय अर सात नोकषायनिकी ज्ञानावरणादि छह कर्मनिके समान आयामविषै गुणश्रेणि करै है। तहां उदयरूप पुरुषवेद संज्वलन क्रोधके द्रव्यकौं तौ अपकर्षण करि उदय समयतैं लगाय अर अन्य कषायनिका द्रव्यकौं अपकर्षणकरि उदयावलीतैं बाह्य समयतैं लगाय पूर्वोक्त प्रकार गुणश्रेणि आयाम अंतरायाम द्वितीय स्थितिविषै निक्षेपण करै है। बहुरि तब ही सात नोकषायनिका द्रव्य आनुपूर्वी विना जहां तहां संक्रमण करै है। बहुरि तब ही पुरुषवेदके बंधका प्रारंभ हो है ॥ ३२३ ॥

पुंसंजलणिदराणं वस्सा बत्तीसयं तु चउसट्ठी ।
संखेज्जसहस्साणि य तक्काले होदि ठिदिबंधो ॥

पुंसंज्वलनेतरेषां वर्षाणि द्वात्रिंशत् चतुःषष्टिः ।
संख्येयसहस्राणि च तत्काले भवति स्थितिबंधः ॥ ३२४ ॥

सं० टी०— अवतारकस्य पुंवेदोदयप्रथमसमये पुंवेदस्य द्वात्रिंशद्वर्षमात्रः स्थितिबंधः । संज्वलनचतुष्कस्य च चतुःषष्टिवर्षमात्रः । घातित्रयस्य संख्यातसहस्रवर्षमात्रः । नामगोत्रयोस्ततः संख्येयगुणः । वेदनीयस्य ततो द्व्यर्धगुणः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०— उतरनेवालेकैं पुरुषवेद उदयका प्रथम समयविषैं पुरुष वेदका बत्तीसवर्ष, संज्वलन चतुष्कका चौसठि वर्ष, तीन घातियानिका संख्यात हजार वर्ष, नाम गोत्रका तातैं संख्यातगुणा, वेदनीयका तातैं ड्योढा स्थितिबंध हो है ॥ ३२४ ॥

पुरिसे दु अणुवसंते इत्थी उवसंतगोत्ति अद्धाए ।
संखाभागासु गदेसु संखवस्सं अघादिठिदिबंधो ॥

पुरुषे तु अनुपशांते स्त्री उपशांतका इति अद्धायाः ।
संख्यभागेषु गतेष्वसंख्यवर्षं अघातिस्थितिबंधः ॥ ३२५ ॥

सं० टी०— पुंवेदोदयकालेऽन्तर्मुहूर्तमात्रे यावत् स्त्रीवेदोपशमनं न विनश्यति तावत्काले संख्यातभागेषु गतेषु अघातिकर्मणां स्थितिबंधोऽसंख्यातवर्षमात्रः ॥ ३२५ ॥

स० चं०— पुरुषवेदका उदय कालविषै स्त्रीवेदका उपशम यावत् काल न विनसै तावत्कालके संख्यात बहुभाग व्यतीत भएं एक भाग अवशेष रहैं अघातिया कर्मनिका स्थिति बंध असंख्यात हजार वर्षमात्र हो है ॥ ३२५ ॥

णवरि य णामदुगाणं वीसियपडिभागदो हवे बंधो ।
तीसियपडिभागेण य बंधो पुण वेयणीयस्स ॥३२६॥

नवरि च नामद्विकयोः वीसियप्रतिभागतो भवेद् बंधः ।
तीसियप्रतिभागेन च बंधः पुनः वेदनीयस्य ॥ ३२६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०— तत्र नामगोत्रयोः पल्यासंख्यातैकभागमात्रः स्थितिबंधः । वीसियस्थितिबन्धे एतावति तीसियस्थितिबंधः कियानिति त्रैराशिकसिद्धो वेदनीयस्थितिबन्धो द्व्यर्धगुणितपल्यासंख्यातभागमात्रः—

प फ इ लब्ध प ३
२० प ३० a २
a

घातित्रयस्य संख्यातसहस्रवर्षमात्रः स्थितिबंधः । ततः संख्येयगुणहीनो मोहनीयस्य संख्यातसहस्रवर्षमात्रः स्थितिबंधः ॥ ३२६ ॥ अथ स्त्रीवेदोपशमनविनाशप्ररूपणार्थं गाथाद्वयमाह—

स० चं०— तहां विशेष जो नाम गोत्रनिका पल्यके असंख्यातवे भागमात्र स्थितिबंध है। अर वीसियनिका इतना भया तौ तीसीयनिका केता होइ ऐसैं त्रैराशिक कीएं वेदनीयका ड्योढ गुणा पल्यका असंख्यातवां भागमात्र स्थितिबंध है। बहुरि तीन घातियानिका संख्यात हजार वर्षमात्र मोहनीयका तातैं संख्यातगुणा घटता संख्यात हजार वर्षमात्र स्थितिबंध है ॥ ३२६ ॥

थी अणुवसमे पढमे वीसकसायाण होदि गुणसेढी ।
संढुवसमोत्ति मज्झे संखाभागेसु तीदेसु ॥ ३२७ ॥

स्त्री अनुपशमे प्रथमे विंशकषायाणां भवति गुणश्रेणी ।
षंढोपशम इति मध्ये संख्यभागेष्वतीतेषु ॥ ३२७ ॥

सं० टी०—ततः संख्यातसहस्रस्थितिबंधेषु अंतर्मुहूर्तकाले गतेषु एकस्मिन् समये स्त्रीवेदोपशमो विनष्टः । ततः प्रभृति स्त्रीवेदद्रव्यं संक्रमापकर्षणादिकरणायोग्यं संजातमित्यर्थः । तस्मिन् स्त्रीवेदोपशमनविनाशप्रथमसमये स्त्रीवेदद्रव्यमपकृष्य तस्योदयरहितत्वादुदयावलिबाह्यगुणश्रेण्यायामे अंतरायामे द्वितीयस्थितौ च पूर्वोक्तविधानेन निक्षिपति । अत्र गुणश्रेण्यायामः शेषकर्मणां गलितावशेषगुणश्रेण्यायामसमानः । द्वादशकषायसप्तनोकषायाणां द्रव्यमपकृष्य पू-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वोक्तप्रकारेण गलितावशेषगुणश्रेण्यायामे अंतरायामे द्वितीयस्थितौ च निक्षिपति । एवं विंशतिकषायाणां गुणश्रेणी-करणं प्ररूपितं । यावन्नपुंसकवेदोपशमोऽस्ति तावत्कालस्य संख्यातबहुभागेषु गतेषु तन्मध्ये ॥ ३२७ ॥

स० चं०— तातैं बंधनेरूप संख्यात हजार स्थिति बंध भएं अंतर्मुहूर्त काल गएं स्त्रीवेदका उपशम नष्ट भया । तहांतैं लगाय स्त्रीवेदका द्रव्य संक्रम अपकर्षणादि करने योग्य भया । तिसका प्रथम समयविषै स्त्रीवेदका द्रव्यकौं अपकर्षणकरि यहु उदय रहित है तातैं उदय वाह्यतैं लगाय अन्य कर्मनिका गुणश्रेणि आयामकैं समान गलितावशेष गुणश्रेणि आयामविषै अर अंतरायामविषै अर द्वितीय स्थितिविषै निक्षेपण करै है । अर बारह कषाय सात नोकषायनिका द्रव्यकौं अपकर्षणकरि पूर्वोक्त प्रकार निक्षेपण करै है ऐसैं इहां वीसकषायनिका गुणश्रेणि हो है । बहुरि तिस ही कालविषै यावत् नपुंसक वेदका उपशम पाइए है तावत्कालका संख्यात बहुभाग व्यतीत भएं कहा ? सो कहैं हैं—

घादितियाणं णियमा असंखवस्सं तु होदि ठिदिबंधो ।
तक्काले दुट्ठाणं रसबंधो ताण देसघादीणं ॥

घातित्रयाणां नियमात् असंख्यवर्षस्तु भवति स्थितिबंधः ।
तत्काले द्विस्थानं रसबंधः तेषां देशघातिनाम् ॥ ३२८ ॥

सं० टी०— घातित्रयस्य स्थितिबन्धः पल्यासंख्यातभागः स चासंख्यातवर्षमात्रः, नामगोत्रयोस्ततोऽसंख्येयगुणः पल्यासंख्यातभागमात्रः । वेदनीयस्य द्व्यर्धगुणितस्तावन्मात्रः, मोहनीयस्य संख्यातसहस्रवर्षमात्रः स्थितिबंधः । अस्मिन्नेवावसारे तेषां चतुर्ज्ञानावरणीयत्रिदर्शनावरणीयपंचांतरायाणां देशघातिनां लतादारुसमानद्विस्थानानुभागबंधो भवति ॥ ३२८ ॥ अथ नपुंसकवेदोपशमनविनाशं तत्कालसंभवक्रियाविशेषं च प्ररूपयितुं गाथाद्वयमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०– तीन घातियानिका पल्यके असंख्यातवे भागमात्र नाम गोत्रका तातैं असंख्यातगुणा वेदनीयका तातैं ड्योढा मोहका संख्यात हजार वर्षमात्र स्थितिबंध हो है। इस ही अवसरविषै च्यारि ज्ञानावरण तीन दर्शनावरण पांच अंतराय इन देश घातियानिका लता अर दारु समान द्विस्थानगत अनुभागबंध हो है॥ ३२८॥

संढणुवसमे पढमे मोहिगिवीसाण होदि गुणसेढी।
अंतरकदोत्ति मज्झे संखाभागासु तीदासु॥ ३२९॥

षंढानुपशमे प्रथमे मोहैकविंशानां भवति गुणश्रेणी।
अंतरकृत इति मध्ये संख्यभागेष्वतीतेषु॥ ३२९॥

सं० टी०—ततः संख्यातसहस्रस्थितिबंधेषु एकस्मिन् समये नपुंसकवेदोपशमो विनष्टः। तत्प्रथमसमये नपुंसकवेदद्रव्यमपकृष्य इतरकर्मगलितावशेषगुणश्रेण्यायामसमाने उदयावलिबाह्यगुणश्रेण्यायामे अंतरायामे द्वितीयस्थितौ च पूर्वोक्तविधानेन निक्षिपति। अवशिष्टविंशतिमोहप्रकृतीनां द्रव्यमपकृष्य गलितावशेषगुणश्रेणिं प्राग्वत् करोति। नपुंसकवेदोपशमविनाशप्रथमसमयादारभ्य आरोहकानिवृत्तिकरणस्यांतरकरणनिष्ठापनचरमसमयपर्यंतं योऽन्तर्मुहूर्तकालस्तस्य संख्यातबहुभागेषु गतेषु तदन्तरे॥३२९॥

स० चं०– तातैं बंधता क्रमकरि संख्यात हजार स्थितिबंध गएं नपुंसक वेदका उपशम नष्ट भया ताके प्रथम समयविषै नपुंसक वेदके द्रव्यकौं अपकर्षणकरि उदयावलीतैं बाह्य समयतैं लगाय अर अन्य बीस मोह प्रकृतिनिके द्रव्यकौं अपकर्षणकरि पूर्वोक्त प्रकार अन्य कर्मनिके समान गलितावशेष गुणश्रेणि आयामविषै अंतरायामविषै द्वितीय स्थितिविषै निक्षेपण करै है। बहुरि नपुंसक वेदका उपशम नाश होनेके समयतैं लगाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उतरता संता चढनेवाला जिस अवसरविषै अंतर करणका समाप्तपना करै तिस अवसर पावने पर्यंत अंतर्मुहूर्त्त काल है ताका संख्यात बहुभाग व्यतीत भएं कहा ? सो कहैं हैं—

मोहस्स असंखेज्जा वस्सपमाणा हवेज्ज ठिदिबंधो ।
ताहे तस्स य जादं बंधं उदयं च दुट्ठाणं ॥ ३३० ॥

मोहस्य असंख्येयानि वर्षप्रमाणानि भवेत् स्थितिबंधः ।
तस्मिन् तस्य च जातो बंध उदयश्च द्विस्थानम् ॥ ३३० ॥

सं० टी०— मोहनीयस्यासंख्यातवर्षमात्रः स्थितिबन्धः । ततोऽसंख्येयगुणो घातित्रयस्य स्थितिबन्धः । ततोऽसंख्येयगुणो नामगोत्रयोः स्थितिबन्धः । ततो विशेषाधिको वेदनीयस्य स्थितिबन्धः । तस्मिन्नेवावसरे मोहनीयस्य द्विस्थानानुभागबंधोदयौ जातौ ॥ ३३० ॥ अथावतरणो लोभसंक्रमप्रतिघातादिप्ररूपणार्थं गाथात्रयमाह—

स० चं०— मोहनीयका असंख्यातवर्ष तीन घातियानिका तातैं असंख्यातगुणा, नाम गोत्रका तातैं असंख्यातगुणा, वेदनीयका तातैं अधिक स्थितिबंध हो है । इस ही अवसरविषै मोहनीयका लता दारुरूप द्विस्थानगत बंध वा उदय भया ॥ ३३० ॥

लोहस्स असंकमणं छावलितीदेसु दीरणत्तं च ।
णियमेण पडंताणं मोहस्सणुपुव्विसंकमणं ॥ ३३१ ॥

लोभस्य असंक्रमणं षडावल्यतीतेषूदीरणत्वं च ।
नियमेन पततां मोहस्यानुपूर्विसंक्रमणम् ॥ ३३१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० टी०— अवतारकसूक्ष्मसांपरायप्रथमसमयादारभ्याधःसर्वावस्थासु बध्यमानज्ञानावरणादिकर्मणां समयप्रबद्धद्रव्यमारोहके षडावलिका व्यतिक्रम्य उदीयत इति नियमः प्रागुक्तः, तं परित्यज्य इदानीं बंधावलीव्यतिक्रमे उदीयते । अवतारकानिवृत्तिकरणप्रथमसमयादारभ्य लोभस्यासंक्रमोऽधः सर्वत्रारोहकविपर्ययेण प्रतिहन्यते । संज्वलनलोभस्य मायादिषु संक्रमणशक्तिःपरिप्राप्ता तिर्जातेत्यर्थः । तथा मोहस्य नपुंसकादिप्रकृतीनां आनुपूर्वीसंक्रमश्च नष्टः । आरोहके य आनुपूर्वीसंक्रमः प्रागुक्तस्तं परित्यज्य इदानीमनानुपूर्व्या बध्यमाने सजातीयप्रकृत्यंतरे यत्र यत्र वा संक्रमो जातः इत्यर्थः ॥ ३३१ ॥

स० चं०— उतरनेवालेकैं सूक्ष्म सांपरायका प्रथम समयतैं लगाय बंधे थे जे कर्म तिनकी आवली व्यतीत भएं उदीरणा होनेका नियम था ताकौं छोडि बंधावली व्यतीत होतैं ही उदीरणा करिए है बहुरि उतरने वालेकैं अनिवृत्ति करणका प्रथम समयतैं लगाय लोभका संक्रमण था सो चढनेवालेतैं विपरीत रूपकरि हणिए है । संज्वलन लोभकी मायादिकविषै संक्रम होनेकी शक्ति भई यहु अर्थ जानना । बहुरि मोहकी सर्व प्रकृतिनिका जो आनुपूर्वी संक्रमका नियम भया था सो नष्ट भया जहां तहां स्वजातीय कोई चारित्र मोहकी प्रकृतिका कोई चारित्र मोहकी प्रकृतिनिविषै संक्रमण हो है ॥ ३३१ ॥

विवरीयं पडिहण्णदि विरयादीणं च देसघादित्तं ।
तह य असंखेज्जाणं उदीरणा समयपबद्धाणं ॥३३२॥

विपरीतं प्रतिहन्यते वीर्यादीनां च देशघातित्वम् ।
तथा च असंख्येयानामुदीरणा समयप्रबद्धानाम्॥ ३३२ ॥

सं० टी०—एवमुक्तप्रकारेण स्थितिबंधसहस्रेषु गतेषु वीर्यांतरायस्यानुभागबन्धो देशघातिस्वरूपं परित्यज्य सर्वघातिस्वरूपो जातः । ततः स्थितिबन्धपृथक्त्वेषु गतेषु मतिज्ञानावरणीयोपभोगांतराययोरनुभागबन्धो देशघातिरूपं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुक्त्वा सर्वघातिरूपो जातः। ततः स्थितिबन्धपृथक्त्वेषु गतेषु चक्षुर्दर्शनावरणीयस्यानुभागबन्धो देशघातिरूपं मुक्त्वा सर्वघातिरूपो जातः। ततः स्थितिबन्धपृथक्त्वेषु गतेषु श्रुतज्ञानावरणीयचक्षुर्दर्शनावरणीयभोगांतरायाणामनुभागबन्धो देशघातिरूपं मुक्त्वा सर्वघातिरूपो जातः। ततः स्थितिबन्धपृथक्त्वेषु गतेषु अवधिज्ञानावरणीयावधिदर्शनावरणीयला-भांतरायाणामनुभागबन्धो देशघातिरूपं त्यक्त्वा सर्वघातिरूपो जातः। ततः स्थितिबन्धपृथक्त्वेषु गतेषु मनःपर्ययज्ञा-नावरणीयदानांतराययोरनुभागबन्धो देशघातिरूपं त्यक्त्वा सर्वघातिरूपो जातः। ततः स्थितिबंधसहस्रेषु असंख्यातस-मयप्रबद्धोदीरणा प्रतिहन्यते ॥ ३३२ ॥

स० चं०— ऐसैं बंधता क्रमरूप हजारौं स्थितिबंध गएं वीर्यांतरायका, तातैं परै बहुत स्थिति बंध गएं मति ज्ञानावरण उपभोगांतरायका, तातैं परै बहुत स्थिति बंध गएं चक्षु-र्दर्शनावरणका अर तातैं परैं बहुत स्थितिबंध गएं श्रुतज्ञानावरणीय अर चक्षुर्दर्शनावरणीय भोगांतरायका बहुरि तातैं परैं बहुत स्थिति बंध गएं अवधि ज्ञानावरणीय अवधि दर्शना-वरण लाभांतरायनिका अर तातैं परैं बहुत स्थितिबंध गएं मनःपर्यय ज्ञानावरण दानां-तरायका क्रमतैं पूर्वोक्त देशघाती बंध होता था ताकौं छोडि सर्वघाती रूप अनुभागबंध होने लगा तातैं परैं हजारौं स्थिति बंध भएं असंख्यात समयप्रबद्धकी उदीरणा होनेका अ-भाव भया ॥ ३३२ ॥

लोयाणमसंखेज्जं समयपबद्धस्स होदि पडिभागो ।
तत्तियमेत्तद्दव्वस्सुदीरणा वट्टदे तत्तो ॥ ३३३ ॥

लोकानामसंख्येयं समयप्रबद्धस्य भवति प्रतिभागः ।
तावन्मात्रद्रव्यस्योदीरणा वर्तते ततः॥ ३३३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विशेषाधिकः प॥/a४ ततः संख्यातसहस्रस्थितिबन्धेषु गतेषु सर्वतः स्तोको नामगोत्रयोः स्थितिबन्धः प/a३ ततो विशेषाधिको घातित्रयवेदनीययोः प/a।३।२ ३ ततोऽर्धाधिको मोहनीयस्य प/a३ २ एवं सिद्धांताविरोधेन स्थितिबन्धाल्पबहुत्वं ज्ञातव्यं ॥ ३३५ ॥

स० चं– तातैं असंख्यात हजार स्थितिबंध गएं सर्वतैं स्तोक मोहका तातैं असंख्यातगुणा नाम गोत्रका तातैं विशेष अधिक तीन घातिया अर वेदनीयका स्थितिबंध हो है। बहुरि तातैं संख्यात हजार स्थिति बंध गएं सर्वतैं स्तोक नाम गोत्रका पल्यके असंख्यातवे भागमात्र तातैं विशेष अधिक मोहका तातैं विशेष अधिक तीन घातिया अर वेदनीयका स्थितिबंध हो है। बहुरि तातैं परैं संख्यात हजार स्थितिबंध गएं सर्वतैं स्तोक नाम गोत्रका तातैं विशेष अधिक तीन घातिया अर वेदनीयका तातैं तीसरा भाग अधिक मोहका स्थितिबंध हो है ॥ ३३५ ॥

कमकरणविणट्ठादो उवरिट्ठविदा विसेसअहियाओ।
सव्वासिं तण्णट्ठे हेट्ठा सव्वासु अहियकमं ॥

क्रमकरणविनाशात् उपरि स्थिता विशेषाधिकाः।
सर्वासां तदद्धायां अधस्तना सर्वासु अधिकक्रमं ॥ ३३६ ॥

सं० टी०— क्रमकरणविनाशस्य व्युत्क्रमणकालस्योपरि तत्कालावसानपल्यासंख्यातभागमात्रस्थितिबन्धात्प्रभृत्युत्तरकाले सर्वकर्मप्रकृतीनां स्थितिबन्धाः विशेषाधिकाः स्थापिताः रचिता इत्यर्थः। क्रमकरणविनाशादधस्तात्तत्कालादिनाऽसंख्येयवर्षमात्रस्थितिबन्धात्पूर्वं संख्यातवर्षसहस्रस्थितिबन्धपर्यंतमायुर्वर्जितसप्तकर्मप्रकृतीनां स्थितिबन्धाः विशेषाधिकाः ॥ ३३६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं– क्रम करणका विनाश जिस कालविषै भया तिस कालके ऊपरि तिस काल का अंत समयविषै पल्यका असंख्यातवां भागमात्र स्थितिबंध भया तातैं लगाय पीछैं उत्तर कालविषै सर्व कर्म प्रकृतिनिका जे स्थितिबंध हैं ते पूर्व स्थितिबंधतैं उत्तर स्थितिबंध विशेष अधिक स्थापे हैं। गुणकार रूप नाही हैं। बहुरि क्रमकरणका नाशके नीचैं तिस क्रमकरणका कालकी आदिविषै असंख्यात वर्षमात्र स्थितिबंध है तातैं पहिलैं संख्यात हजार वर्ष प्रमाण स्थितिबंध पर्यंत आयु विना सात कर्मनिका बंध हो है। ते भी पूर्व स्थिति बंधतैं उत्तर स्थितिबंध अधिक क्रम लीएं हो हैं गुणकार रूप नाही हैं ॥ ३३६ ॥

जत्तोपाये होदि हु असंखवस्सप्पमाणठिदिबंधो।
तत्तोपाये अण्णं ठिदिबंधमसंखगुणियकमं ॥

यदुत्पादे भवति हि असंख्यवर्षप्रमाणस्थितिबंधः।
तदुपायेन अन्यं स्थितिबंधमसंख्यगुणितक्रमं ॥ ३३७ ॥

सं० टी०— यतः प्रभृति नामगोत्रादिकर्मप्रकृतीनामसंख्यातवर्षमात्रस्थितिबन्धः प्रारब्धः। ततः प्रभृति पूर्वपूर्वस्थितिबन्धादुत्तरोत्तरस्थितिबंधोऽन्योऽसंख्येयगुणो भवति यावत्सर्वपश्चिमः पल्यासंख्यातभागमात्रः स्थितिबंधो जायते ३३७

स० चं– जहांतैं लगाय नाम गोत्रादिकनिका असंख्यात वर्षमात्र स्थितिबंधका प्रारंभ भया तहांतैं लगाय पहला पहला स्थितिबंधतैं पिछला पिछला और स्थितिबंध भया सो असंख्यात गुणा है यावत् सर्वतैं पीछैं पल्यका असंख्यातवां भाग मात्र स्थितिबंध होइ तावत् ऐसाही क्रम जानना ॥ ३३७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं पल्लासंखं संखं भागं च होइ बंधेण ।
एत्तोपाये अण्णं ठिदिबंधो संखगुणियकमं ॥३३८॥

एवं पल्यासंख्यं संख्यं भागं च भवति बंधेन ।
एतदुपायेन अन्यः स्थितिबंधः संख्यगुणितक्रमः ॥ ३३८ ॥

सं० टी०— एवं संख्यातसहस्रेषु पल्यासंख्यातभागप्रमितेषु स्थितिबंधेषु सर्वपश्चिमपल्यासंख्यातभागमात्रस्थितिबंधात्परं युगपदेव सप्तकर्मणां पल्यासंख्यातभागमात्रः स्थितिबन्धो जातः । तत्र वीसियस्थितिबंधात तीसियस्थितिबंधो द्व्यर्धगुणितः । चालीसियस्थितिबंधो द्विगुण इति विशेषः पूर्ववद्द्रष्टव्यः । आरोहकस्य क्रमेणोपलभ्यमानो दूरापकृष्टिविषयस्थितिबंधः कथमवरोहकस्यैकवारमेव संभवतीति नाशंकनीयं प्रतिपातिपरिणाममाहात्म्येन तत्र तथाभावस्य विरोधाभावात् । इतः प्रभृत्यनंतरस्थितिबंधोऽन्यः संख्यातगुणितः सप्तकर्मणां जायते ॥ ३३८ ॥

स० चं– ऐसैं यथासंभव हीनाधिक प्रमाण लीए पल्यका असंख्यातवां भाग मात्र स्थितिबंध बंधता क्रम लीएं संख्यात हजार व्यतीत भएं तहां सर्वतैं पीछैं जो पल्यका असंख्यातवां भाग मात्र स्थितिबंध भया तातैं परैं एक एक कालविषैं सातो कर्मनिका स्थिति बंध पल्यके असंख्यातवे भागमात्र हो है । तहां विशेष जो वीसीयनिकेतैं तीसयिनिका ड्योढा, चालीसियनिका दूणा स्थितिबंध जानना । पल्यका असंख्यातवे भागके भेद घने तातैं हीनाधिक रूप घने स्थितिबंधनिकौं आलापकरि पल्यका असंख्यातवां भागमात्र ही कह्या है चढनेवालेकैं दूरापकृष्टि नामा स्थितिबंध क्रमतैं भया था इहां उतरनेवालेकैं प्रतिपाती परिणामनिकरि एकहीवार दूरापकृष्टिनामा स्थितिबंध हो है यातैं परैं अनंतर और स्थितिबंध हो है सो सातो कर्मनिका संख्यात गुणा हो है ॥ ३३८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मोहस्स य ठिदिबंधो पल्ले जादे तदा दु परिवड्ढी ।
पल्लस्स संखभागं इगिविगलासण्णिबंधसमं ॥२२९॥

मोहस्य च स्थितिबंधः पल्ये जाते तदा तु परिवृद्धिः ।
पल्यस्य संख्यभागं एकविकलासंज्ञिबंधसमं ॥ २२९ ॥

सं० टी०—— एवं संख्यातगुणितवृद्धिक्रमेण संख्यातसहस्रस्थितिबंधोत्सरणेषु सर्वपश्चिमस्थितिबंधो नामगोत्रयोः पल्यासंख्यातैकभागमात्रः प $\frac{\text{१}}{\text{५}}$ ततस्तीसियस्थितिबन्धो द्व्यर्धगुणितः प $\frac{\text{३}}{\text{५ २}}$ ततः मोहनीयस्थितिबंधो द्विगुणः प $\frac{\text{२}}{\text{५}}$ तदनंतरस्थितिबन्धो मोहस्य संपूर्णपल्यमात्रः ।प। अत्र वृद्धिप्रमाणं पल्यासंख्यातबहुभागमात्रं प $\frac{\text{५ – २}}{\text{५}}$ तीसियस्थितिबंधः पल्यत्रिचतुर्भागमात्रः प $\frac{\text{३}}{\text{४}}$ अत्र वृद्धिप्रमाणं अनंतराधस्तनस्थितिप्रमाणेन प $\frac{\text{३}}{\text{५ २}}$ अनेन साधिकपल्यचतुर्भाग प $\frac{\text{१}}{\text{४}}$ न्यूनपल्यमात्रं प $\frac{\text{५}}{\text{५ ४}}$ वीसियस्थितिबंधः पल्यार्धमात्रः प $\frac{\text{१}}{\text{२}}$—अत्र वृद्धिप्रमाणं अनंतराधस्तनस्थितिबंधमात्रेण पल्यासंख्यातभागेन प $\frac{\text{}}{\text{५}}$ न्यूनपल्यार्धमात्रं प $\frac{\text{१}}{\text{२}}$ – पूर्वस्थितिबंधे उत्तरोत्तरस्थितिबंधे शोधिते अवशेषमात्रं वृद्धिप्रमाणं सर्वत्र ज्ञातव्यं ।

चालीसियस्थितिबंधस्य यदि पल्यमात्रः स्थितिबंधो लभ्यते तदा तीसियस्थितिबन्धस्य कीदृशः स्थितिबंधो भवति—
प्र फ इ इति त्रैराशिकसिद्धः पल्यत्रिचतुर्भागमात्रस्तीसियस्थितिबंधः । तथा वीसियस्थितिबंधमिच्छाराशिं कृत्वा
४० ५ ३०
त्रैराशिकसिद्धो प्र फ इ वीसियस्थितिबंधः पल्यार्धमात्रः । एवं मोहनीयस्य स्थितिबंधो यदा पल्यमात्रो जातः
४० ५ २०
ततः परमनंतरानंतरस्थितिबंधोत्सरणेषु पल्यासंख्यातैकभागमात्रं वृद्धिप्रमाणं द्रष्टव्यं । ततः संख्यातसहस्रेषु स्थितिबंधो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्सरणेषु गतेषु मोहस्य स्थितिबंधः एकेंद्रियस्थितिबंधसदृशः सागरोपमचतुःसप्तमभागमात्रः सा ४/७ तीसियस्थितिबंधः सागरोपमत्रिसप्तमभागमात्रः सा ३/७ वीसियस्थितिबंधः सागरोपमद्विसप्तमभागमात्रः स २/७ एवं प्रतिकांडकं संख्यातसहस्र-स्थितिबंधोत्सरणेषु गतेषु द्वींद्रियत्रींद्रियचतुरिंद्रियासंज्ञिपंचेन्द्रियस्थितिबंधसदृशा मोहनीयस्य स्थितिबंधाः परमागमोक्त-प्रतिभागक्रमेण ज्ञातव्याः ॥ ३३९ ॥

स० चं– ऐसैं संख्यातगुणा क्रम लीएं संख्यात हजार स्थितिबंधोत्सरण भएं सबतैं पीछैं नाम गोत्रका पल्यके असंख्यातवे भागमात्र तातैं ड्योढ़ा तीसीयनिका दूना मोहका स्थितिबंध होइ। ताके अनंतरि मोहका पल्यमात्र तीसीयनिका पल्यका तीन चौथा भागमात्र वीसीयनिका आधा पल्यमात्र स्थितिबंध हो है पूर्व पूर्व स्थितिबंधके प्रमाणकौं उत्तर उत्तर स्थिति बंधका प्रमाणविषैं घटाएं अवशेष रहै सोई पूर्वोक्त स्थितिबंधतैं उत्तर स्थितिबंधविषै वृद्धिका प्रमाण हो है। सो इहां भी साधनकरि जानना। बहुरि चालीसीयनिका स्थितिबंध पल्यमात्र होइ तौ तीसीय अथवा वीसीयनिका केता होइ ? ऐसैं त्रैराशिककरि तीसीयनिका पल्यका तीन चौथा भागमात्र वीसीयनिका आधापल्यमात्र स्थितिबंध सिद्ध हो है। ऐसैं अन्यत्र भी त्रैराशिक जानना जैसैं स्थिति घटावनेविषै पूर्वै स्थिति बंधापसरण संज्ञा कही थी तैसैं स्थिति बधावनेविषैं इहां स्थितिबंधोत्सरण संज्ञा जाननी सो एक एक स्थितिबंधोत्सरण-विषैं पल्यका असंख्यातवां भागमात्र स्थितिबंधै ऐसैं प्रत्येक संख्यातहजार स्थितिबंध होइ क्रमतैं एकेंद्री वेइंद्री तेइंद्री चोइंद्री असंज्ञी पंचेंद्रीका स्थितिबंधके समान स्थितिबंध हो है॥ ३३९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मोहस्स पल्लबंधे तीसदुगे तत्तिपादमद्धं च।
दुतिचरुसत्तमभागा वीसतिये एयवियलठिदी॥

मोहस्य पल्यबंधे त्रिंशद्विके तत्त्रिपादमर्धं च।
द्वित्रिचतुःसप्तमभागा वीसत्रिके एकविकलस्थितिः॥ ३४० ॥

सं० टी०— यदा मोहस्य पल्यमात्रस्थितिबंधो जातस्तदा तीसियस्थितिबंधः पल्यत्रिचतुर्भागमात्रः। वीसियस्थितिबंधः पल्यार्धमात्रः। पुनरेकेंद्रियस्थितिबन्धसदृशा वीसियतीसियमोहानां स्थितिबन्धाः सागरोपमस्य द्विसप्तमत्रिसप्तमचतुःसप्तमभागमात्राः। पुनर्द्वीन्द्रियादिस्थितिबंधा सदृशा वीसियादिस्थितिबंधाः पंचविंशतिपंचाशच्छतसहस्रगुणिता असंज्ञिस्थितिबंधपर्यंता अनुमन्तव्याः—

मो प २ ३	प २ ५।५।५।५	प २ ५ ५ ५	प २ ५	प १
ती प ३ ३ २	प ५ ५ ५ ५ ३ २	प ५ ५ ५ ३ २	प ३ ५। २	प ३ ४
वी प ३	प ५ ५ ५ ५	प ५ ५ ५	प ५	प १ २

अवतारकानिवृत्तिकरणचरमसमयस्थितिबंधप्ररूपणार्थमाह—

सं० च०— जब मोहका स्थितिबंध पल्यमात्र भया तब तीसीयनिका पल्यका तीन चौथाभागमात्र वीसीयनिका आधा पल्यमात्र स्थितिबंध हो है सोई कहि आए हैं। बहुरि एकेंद्री समान स्थिति बंध भया तहां मोहका सागरके च्यारि सातवां भागमात्र तीसीयनिका सागरके तीन सातवां भागमात्र वीसीयनिका सागरके दोय सातवां भागमात्र स्थितिबंध

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जानना । बहुरि बेंद्री तेंद्री चौंद्री असंज्ञी समान स्थितिबंध जहां भया तहां क्रमतैं एकेंद्री समान बंध पचीसगुणा पचासगुणा सौगुणा हजारगुणा क्रमतैं जानना ॥ ३४० ॥

तत्तो अणियट्टिस्स य अंतं पत्तो हु तत्थ उदधीणं ।
लक्खपुधत्तं बंधो से काले पुव्वकरणो हु ॥

तत: अनिवृत्तेश्च अंतं प्राप्तो हि तत्र उदधीनाम् ।
लक्षपृथक्त्वं बंधः स्वे काले अपूर्वकरणो हि ॥ ३४१ ॥

सं० टी०— ततोऽसंज्ञिपंचेंद्रियस्थितिबंधात्परं संख्यातसहस्रेषु स्थितिबंधोत्सरणेषु गतेषु अवतारकानिवृत्तिकरण-चरमसमयं प्राप्तः । तस्मिन् वीसियादिस्थितिबन्धः स्वस्वप्रतिभागगुणितः सागरोपमलक्षपृथक्त्वमात्रो भवति—
मो सा ल ७ । ४ तीसिय सा ल ७ । ३ वीसिय सा ल ७ । २ तदनंतरसमये अयमवतारकोऽपूर्वकरणो जातः ३४१
८ । ७ ८ । ७ ८ । ७

अथापूर्वकरणे संभवद्विशेषमाह—

सं० च०— तहां पीछैं असंज्ञी समानबंधतैं परैं संख्यात हजार स्थितिबंधोत्सरण भए उतरनेवाला अनिवृत्तिकरणके अंत समयकौं प्राप्त भया । तहां मोह वीसीय तीसीयनिका क्रमतैं पृथक्त्व लक्ष सागरनिका च्यारि सातवां भाग अर तीन सातवां भाग अर दोय सातवां भागमात्र स्थितिबंध हो है। बहुरि ताके अनंतरि समयविषै उतरने वाला अपूर्व करण भया ॥ ३४१ ॥

उवसामणा णिधत्ती णिकाचणुग्घाडिदाणि तत्थेव ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चदुतीसदुगाणं च य बंधो अद्धापवत्तो य ॥

उपशामना निधत्तिः निकाचना उद्घटितानि तत्रैव ।
चतुस्त्रिंशद्द्विकानां च च बंधो अधाप्रवृत्तः च ॥

सं० टी०— तस्मिन्नवतारकापूर्वकरणे प्रथमसमयादारभ्य अप्रशस्तोपशमनकरणं निधत्तिकरणं निकाचनकरणं च युगपदेवोद्घाटितानि भवंति तत्कालस्य सप्तभागीकृतस्य प्रथमभागे हास्यरतिभयजुगुप्सानां चतुःप्रकृतीनां बंधको जातः । ततोऽवतीर्य तत्कालद्वितीयभागे तीर्थकरत्वादित्रिंशत्प्रकृतीनां बंधको जातः । ततस्तत्कालषष्ठभागचरमसमयादारभ्य निद्राप्रचलयोर्बंधो भवति ततः संख्यातसहस्रस्थितिबंधोत्सरणेषु गतेषु अवतारकापूर्वकरणचरमसमये

४
३०
०
०
०
२

वीसियादिस्थितिबन्धः स्वस्वप्रतिभागगुणितः सागरोपमकोटिलक्षपृथक्त्वमात्रो भवति—

मो सा को ल	७ । ४ ८ । ७
ती सा को ल	७ । ३ ८ । ७
वी सा को ल	७ । २ ८ । ७

सर्वकर्मणां गुणश्रेणी गलितावशेषायामा अद्य यावत्प्रवृत्ता तदनंतरसमये ततोवतीर्याप्रमत्तगुणस्थाने विशुद्धेरनंतगुणसंभवहानिवशेनाधःप्रवृत्तकरणपरिणामं प्राप्नोति ॥ ३४२ ॥ अथावतारकाप्रमत्तस्याधःप्रवृत्तकरणपरिणामप्रथमसमये गुणश्रेणिविशेषप्रदर्शनार्थमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०— ताके प्रथम समयतैं लगाय अप्रशस्तोपशम करण अर निधत्ति करण अर निष्काचन करण ए युगपत उघाडे प्रगट कीए इनिका लक्षण पूर्वैं कह्या ही था। बहुरि अपूर्व करण कालके सात भाग कीएं तहां प्रथम भागविषै हास्य रति भय जुगुप्सा इन च्यारि प्रकृतिनिका दूसरे भाग विषै तीर्थंकरादि तीस प्रकृतिनिका छठा भागका अंत समयतैं लगाय निद्रा प्रचलाका बंध हो है। बहुरि तातैं संख्यात हजार स्थिति बंधोत्सरण भएं उतरनेवाला अपूर्व करणका अंत समयविषैं मोह तीसीय वीसीयानिका क्रमतैं पृथक्त्व लक्ष कोटि सागरनिका च्यारि सातवां भाग तीन सातवां भाग दोय सातवां भाग मात्र स्थितिबंध हो है। सर्व कर्मनिकी गुणश्रेणी गलितावशेष आयाम लीए इहां पर्यंत वर्तै है। ताके अनंतरि समयविषैं उतरि अप्रमत्त गुणस्थान विषैं अधःकरण परिणामकौं प्राप्त हो है॥ ३४२॥

पढमो अधापवत्तो गुणसेढिमवट्ठिदं पुराणादो।
संखगुणं तच्चंतोमुहुत्तमेत्तं करेदी हु॥ ३४३॥

प्रथमोऽधाप्रवृत्तः गुणश्रेणीमवस्थितां पुराणात्।
संख्यगुणं तच्च अंतर्मुहूर्तमात्रं करोति हि॥ ३४३॥

सं० टी०— अथावतारकापूर्वकरणचरमसमये अपकृष्टद्रव्यात् संख्येयगुणहीनं द्रव्यमपकृष्य अवतारकसूक्ष्मसांपरायप्रथमसमयारब्धात् पौराणिकगुणश्रेण्यायामात् संख्यातगुणायाममवस्थितगुणश्रेणिनिक्षेपमवतारकाप्रमत्तः अधःप्रवृत्तकरणप्रथमसमये करोति। विशुद्धिहान्यापकृष्टद्रव्यहानिः गुणश्रेण्यायामः संख्येयगुणोऽप्यंतर्मुहूर्तमात्र एव नाधिकः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



॥ ३४३ ॥ अथ पुराणगुणश्रेण्यनुवादार्थमाह—

स० चं०— ताका प्रथम समयविषै उतरनेवाला अपूर्व करणका अंत समयविषै जेता द्रव्य अपकर्षण कीया तातैं असंख्यातगुणा घटता द्रव्यकौं अपकर्षणकरि गुणश्रेणि करै है। सूक्ष्म सांपरायका प्रथम समयविषै जाका प्रारंभ भया ऐसा पुराणा गुणश्रेणिका आयामतैं संख्यातगुणा है तौ भी अंतर्मुहूर्त्तमात्र याका अवस्थित आयाम जानना। इहां विशुद्धता की हानि होनेतैं गुणश्रेणिविषै द्रव्यका प्रमाण घटि गया आयामका प्रमाण बधि गया है ॥ ३४३ ॥

ओदरसुहुमादीदो अपुव्वचरिमोत्ति गलिदसेसे व।
गुणसेढी णिक्खेवो सट्ठाणे होदि तिट्ठाणं ॥ ३४४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवतरसूक्ष्मादितो अपूर्वचरम इति गलितशेषो वा।
गुणश्रेणी निक्षेपः स्वस्थाने भवति त्रिस्थानं॥ ३४७॥

सं० टी०— अवतारकसूक्ष्मसांपरायप्रथमसमयादारभ्यावतारकापूर्वकरणचरमसमयपर्यंतं ज्ञानावरणादिकर्मणां गुणश्रेण्यायामो गलितावशेषमात्र एव नावस्थितः प्रवृत्तः। अयं तु विशेषः—मोहनीयस्यावतारकसूक्ष्मसांपरायप्रथमसमयात्प्रभृति कियंतमपि कालमवस्थितिस्वरूपेण गुणश्रेणिनिक्षेपो भूत्वा ततः परं गलितावशेषायामेन ज्ञानावरणादिकर्मगुणश्रेण्यायामसदृशो जात इति त्रिषु स्थानेषु वृद्ध्यावस्थितिगुणश्रेण्यायामदर्शनात्। तत्कथं ? अवतारकसूक्ष्मसांपरायकाले सर्वत्रावस्थितिस्वरूपेण, स्पर्धकगतलोभाकर्षणे एकवारवृद्ध्या बादरलोभवेदकाद्धापर्यंतमवस्थितस्वरूपेण, पुनर्मायापकर्षणे द्वितीयवारवृद्ध्या मायावेदककालपर्यंतमवस्थितस्वरूपेण, ततः परं मानापकर्षणे तृतीयवारवृद्ध्या मानवेदककालपर्यंतमवस्थितस्वरूपेण, एवं त्रिषु स्थलेषु गुणश्रेण्यायामः प्रवृत्तः। ततः परं क्रोधापकर्षणे चतुर्थवारवृद्ध्या गुणश्रेण्यायामः, अवतारकापूर्वकरणचरमसमयपर्यंतं गलितावशेषमात्र एवागतः। इदानीं पुनरधःप्रवृत्तकरणप्रथमसमये ज्ञानावरणादिकर्मणां गुणश्रेण्यायामः पुराणगुणश्रेण्यायामात् संख्यातगुणितोऽवस्थितिस्वरूपोऽतर्मुहूर्तपर्यंतं प्रवर्तत इत्यर्थः। अधःप्रवृत्तकरणाद्धामात्रमंतर्मुहूर्तं प्रतिसमयमेकांतेन विशुद्ध्यनंतगुणहान्याऽवतीर्य स्वस्थानाप्रमत्तसंयतो भवति। तस्य च संक्लेशविशुद्धिवशेन वृद्धिहान्यवस्थानलक्षणं स्थानत्रयं गुणश्रेण्यायामस्य संभवति॥ ३४४॥ अथ तत्स्थानत्रयविषयविभागं प्रदर्शयति——

स० चं—उतरनेवाला सूक्ष्म सांपरायका प्रथम समयतैं लगाय अपूर्व करणका अंतसमय पर्यंत ज्ञानावरणादिकनिका गुणश्रेणि आयाम है सो गलितावशेष है अवशेष अवस्थित नाही है। इतना विशेष—सूक्ष्म सांपरायका प्रथम समयतैं लगाय केते इक काल मोहका गुणश्रेणि आयाम अवस्थित हो है। पीछैं और कर्मनिका गुणश्रेणि आयामके समान मोहका भी गुणश्रेणि आयाम गलितावशेष हो है। जातैं तीन स्थाननिविषै बंधिकरि अवस्थित गुणश्रेणि आयाम हो है। सो कहिए है—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उतरनेवाला सूक्ष्मसांपरायका प्रथम समयतैं लगाय अवस्थित आयाम ही है। बहुरि स्पर्धक रूप वादर लोभका द्रव्यके अपकर्षणविषै एकवार गुणश्रेणि आयाम बंधिकरि वादर लोभ वेदक काल पर्यंत अवस्थित रहै है। बहुरि मायाके द्रव्यका अपकर्षणविषै दूसरीबार बंधिकरि मायाका वेदक काल पर्यंत अवस्थित गुणश्रेणि आयाम रहै है। बहुरि मानके द्रव्यका अपकर्षणविषै तीसरीबार बंधिकरि मानका वेदक काल पर्यंत अवस्थित गुणश्रेणि आयाम रहै है। ऐसैं तीनबार अवस्थित गुणश्रेणि आयाम हो है। बहुरि चौथीबार क्रोधका अपकर्षणविषै बंधिकरि अपूर्व करणका अंत पर्यंत अन्य कर्मनिके समान मोहका भी गलितावशेष गुणश्रेणि आयाम आया। बहुरि अधःप्रवृत्त करणका प्रथम समयतैं लगाय अंतर्मुहूर्त पर्यंत पुराना गुणश्रेणि आयामतैं संख्यातगुणा ज्ञानावरणादि कर्मनिका अवस्थित गुणश्रेणि आयाम प्रवर्तै है। अधःप्रवृत्त करणका जेता अंतर्मुहूर्त काल है तितना कालविषै समय समय एकांतपनैं अनंतगुणी घाटि विशुद्धताकरि उतरि पीछैं स्वस्थान अप्रमत्त हो है॥ ३४४॥

सट्ठाणे तावदियं संखगुणूणं तु उवरि चडमाणे।
विरदाविरदाहिमुहे संखेज्जगुणं तदो तिविहं॥ ३४५॥

स्वस्थाने तावत्कं संख्यगुणोनं तु उपरि चटमाने।
विरताविरताभिमुखे संख्येयगुणं ततः त्रिविधं॥ ३४५॥

सं० टी०—प्रमत्ताप्रमत्तगुणस्थानयोः स्वस्थानसंयतो भूत्वा वृद्धिहानिभ्यां विनाऽवस्थितं गुणश्रेण्यायामं (गलं)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करोति । विरताविरतगुणस्थानाभिमुखः सन् संक्लेशवशेन प्राक्तनगुणश्रेण्यायामात् संख्यातगुणं गुणश्रेण्यायामं करोति । पुनः स एव यदि परावृत्त्योपशमकक्षपकश्रेण्यारोहणाभिमुखो भवति तदा विशुद्धिवशेन प्राक्तनगुणश्रेण्यायामात् संख्यातगुणहीनं गुणश्रेण्यायामं करोति । एवं गुणश्रेण्यायामस्य वृद्धिहान्यवस्थानलक्षणं स्थानत्रयं व्याख्यातं ॥ ३४५ ॥ अथावतारकाप्रमत्तस्याधःप्रवृत्तकरणे संक्रमसंभवविशेषं प्रदर्शयति—

स० चं०— तहां प्रमत्त वा अप्रमत्त गुणस्थानविषै स्वस्थान संयत होइ वृद्धि हानि रहित अवस्थित गुणश्रेणि आयाम करै है। बहुरि सोई जीव जो विरताविरत पंचम गुणस्थानकौं सन्मुख होइ तौ संक्लेशताकरि पूर्वै गुणश्रेणि आयामतैं संख्यातगुणा बंधता गुणश्रेणि आयाम करै है। अर पलटिकरि उपशम वा क्षपकश्रेणी चढनेकौं सन्मुख होइ तो विशुद्धताकरि तिस गुणश्रेणि आयामतैं संख्यातगुणा घटता गुणश्रेणि आयाम करै है। ऐसैं स्वस्थान संयमीकैं गुणश्रेणिकी वृद्धि हानि अवस्थित रूप तीन स्थान कहे ॥ ३४५ ॥

करणे अधापवत्ते अधापवत्तो दु संकमो जादो ।
विज्झादमबंधाणे णट्ठो गुणसंकमो तत्थ ॥ ३४६ ॥

करणे अधःप्रवृत्ते अधःप्रवृत्तस्तु संक्रमो जातः ।
विध्यातमबंधने नष्टो गुणसंक्रमस्तत्र ॥ ३४६ ॥

सं० टी०— अवतारकाधःप्रवृत्तकरणे बन्धवतामथाप्रवृत्तसंक्रमो जातः । अबंधानां विध्यातसंक्रमः । तत्र गुणसंक्रमो विनष्ट एव ॥ ३४६ ॥ अथ द्वितीयोपशमसम्यक्त्वकालप्रमाणं गाथाद्वयमाह—

स० चं— उतरनेवाला अधःप्रवृत्त करणविषैं जिनि प्रकृतिनिका बंध पाइए तिनकैं तो अथाप्रवृत्त नामा संक्रम भया, इनका अन्य प्रकृतिविषै संक्रम होनेविषै अधःप्रवृत्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नामा भागहार संभवै है। बहुरि जिनका बंध न पाइए तिनकैं विध्यात संक्रमण पाइए है। इनका अन्य प्रकृतिविषै संक्रम होनेविषै विध्यात नामा भागहार संभवै है अर गुण संक्रमका नाश ही भया। इनका स्वरूप पूर्वैं कह्या है सो जानना ॥ ३४६ ॥

चडणोदरकालादो पुव्वादो पुव्वगोत्ति संखगुणं।

कालं अधापवत्तं पालदि सो उवसमं सम्मं ॥

चटनावतरकालतोऽपूर्वात् अपूर्वक इति संख्यगुणं।

कालं अधःप्रवृत्तं पालयति स उपशमं सम्यं ॥ ३४७ ॥

सं० टी०– द्वितीयोपशमसम्यक्त्वेनोपशमकश्रेण्यामारूढस्यापूर्वकरणप्रथमसमयादारभ्य ततोऽवतीर्णापूर्वकरणचरमसमयपर्यंतं यावत्कालस्ततः संख्येयगुणं कालमंतर्मुहूर्तप्रमितं, अधःप्रवृत्तकरणेन स हि द्वितीयोपशमसम्यक्त्वमनुपालयति ॥ ३४७ ॥

स० चं०– द्वितीयोपशम सम्यक्त्व सहित जीव चढतैं अपूर्व करणका प्रथम समयतैं लगाय उतरतैं अपूर्व करणका अंत समय पर्यंत जितना काल भया तातैं संख्यातगुणा ऐसा अंतर्मुहूर्तमात्र द्वितीयोपशम सम्यक्त्वका काल है। सो इस काल पर्यंत अधःप्रवृत्त करण सहित इस द्वितीयोपशम सम्यक्त्वकौं पालै है ॥ ३४७ ॥

तस्सम्मत्तद्धाए असंजमं देससंजमं वापि।

गच्छेज्जावलिछक्के सेसे सासणगुणं वापि ॥ ३४८ ॥

४३७

तत्सम्यक्त्वाद्धायां असंयमं देशसंयमं वापि।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गत्वावलिषट्के शेषे सासनगुणं वापि ॥ ३४८ ॥

सं० टी०— तस्य द्वितीयोपशमसम्यक्त्वकाले अधःप्रवृत्तकरणकालं नीत्वा पुनरप्रत्याख्यानावरणकषायोदयात् असंयमपरिणाममपि गच्छेत् । प्रत्याख्यानावरणकषायोदयाद्देशसंयममपि वा गच्छेत् । अथवा असंयमं प्राप्य तत्रांतर्मुहूर्तं स्थित्वा पश्चाद्देशसंयमं क्रमेण गच्छेत् । देशसंयमं प्राप्य तत्रांतर्मुहूर्तं स्थित्वा पश्चादसंयमं वा क्रमेण गच्छेत् । एवं क्रमेणोभयप्राप्तेः प्रवचने कथितत्वात् । अथवा तदुपशमसम्यक्त्वकालस्यावलिकषट्केऽवशिष्टेऽनंतानुबंधिकषायान्यतमोदयात्सासादनगुणस्थानमपि गच्छेत् ॥ ३४८ ॥ अथ द्वितीयोपशमसम्यक्त्वात्सासादनगुणप्राप्तस्य संभवद्विशेषमाह—

स० चं— तिस ही द्वितीयोपशम सम्यक्त्वका कालविषै अधःप्रवृत्त करण कालकौं समाप्तकरि अप्रत्याख्यानके उदयतैं असंयमकौं प्राप्त होइ तौ चौथे गुणस्थान आवै है । अथवा प्रत्याख्यानके उदयतैं देश संयमकौं प्राप्त होइ तौ पांचवे गुणस्थान आवै अथवा असंयत होइ तहां अंतर्मुहूर्त्त तिष्ठि देश संयम होइ अथवा देश संयत होइ तहां अंतर्मुहूर्त्त तिष्ठि असंयत होइ अथवा तिस कालविषै छह आवली अवशेष रहैं अनंतानुबंधी क्रोधादिविषै किसीका उदयतैं सासादनकौं भी प्राप्त होइ ॥ ३४८ ॥

जदि मरदि सासणो सो णिरयातिरक्खं णरं ण गच्छेदि ।
णियमा देवं गच्छदि जइवसहमुणिंदवयणेण ॥

यदि म्रियते सासनः स निरयातिर्यञ्चं नरं न गच्छति ।
नियमात् देवं गच्छति यतिवृषभमुनींद्रवचनेन ॥ ३४९ ॥

सं० टी०— यदि स उपशमश्रेणितोऽवतीर्णः सासादनः स्वायुःक्षयवशान्म्रियते तदा नरकगतिं तिर्यग्गतिं मनुष्यगतिं च नियमेन न गच्छति किंतु देवगतिं गच्छति । एवमुपशमश्रेणीतोऽवतीर्णस्य सासादनगुणप्राप्तेः । तस्य म-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रणं गतिविशेषश्च कषायप्राभृताख्यद्वितीयसिद्धांतव्याख्याने यतिवृषभाचार्यस्य वचनप्रामाण्येन भणितं ॥ ३४९ ॥

अथ तत्सासादनस्य गतित्रयगमने कारणमाह—

स० चं–उपशम श्रेणीतैं उतर्या जो सासादन जीव सो आयु नाशतैं मरै तौ नारक तिर्यंच मनुष्य गतिकौं प्राप्त न होइ नियमतैं देवगति हीकौं प्राप्त होइ। ऐसैं उपशम श्रेणीतैं उतर्या जीवकैं सासादन गुणस्थानकी प्राप्ति वा ताके मरण होनेका विशेष कह्या है सो कषाय प्राभृत नामा दूसरा महाधवल शास्त्रविषै यतिवृषभ नामा आचार्य प्रतिपादन किया है। ताके अनुसारि इहां कथन कीया है॥ ३४९ ॥

णरतिरियक्खणराउगसत्तो सक्को ण मोहमुवसमिदुं।
तम्हा तिसुवि गदीसु ण तस्स उप्पज्जणं होदि॥

नरकतिर्यग्नरायुष्कसत्त्वः शक्यो न मोहमुपशमयितुम्।
तस्मात् त्रिष्वपि गतिषु न तस्य उत्पादो भवति॥ ३५०॥

